अप प्र° १

१नमः सहस्रशीर्षाय पुरुषार्थप्रदायिने २

गणपतये नमः ॐ हरये नमः विघ्नजालविनाशाय सच्चिदानंदरूपिणे ब्रह्मादिकृतसामर्थ्याय गुणात्मकमयीं शुभां
भवाप्ययकरीं वन्दे प्रतिमां पारमेश्वरीम् २ ब्रह्मविद्योपदेशेन स्वस्वरूपप्रदायिने स्वरूपानन्दरूपविज्ञानरूपाय वै न
मः २ प्राचीनैर्मतमाश्रित्य तेषामेव प्रसादतः व्याख्यानं सारेण प्रयत्नं क्रियते मया ४ बालबोधकरीं स्पष्टां तत्त्व
प्रकाशिनीं अपरोक्षानुभूतीयां परमार्थप्रदीपिकां ५ इह खलु श्रीमदाचार्यवर्यशंकरभगवान्पुरुषार्थकामिनो
मुमुक्षोरेव प्रवृत्तिं सफलीकर्तुमनाद्यनिर्वचनीयाविद्यानिरसनपुरःसरं जीवब्रह्मैक्यानुभवमपरोक्षीकुर्वन्नादौ
शिष्टाचारपरिप्राप्तं मंगलं प्रतिजानीते श्रीहरिमित्यादिना ग्रन्थादौ मंगलस्याचरणं द्रष्टव्यं तत्त्रिविधं मंग

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् व्यापकं सर्वलोकानां कारणं तन्नमाम्यहम् १

तेषु दृष्टदेवतानमस्काररूपं मंगलस्यान्तःकरणशुद्धिहेतुत्वाद्विशिष्टत्वम् तदुक्तं भगवद्गीतायां मन्मना
भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि युक्त्वैवमात्मानं मत्परायण इति नन्वीश्वरस्य जगत्कारण
त्वे जगत्सत्यत्वप्रसक्तेः ईशापत्तिः कार्यकारणयोरभेदात् दुःखित्वाद्यापत्तिश्चेति चेन्न नेह नानेति श्रुतिसि
द्धजगन्मिथ्यात्वावच्छिन्नजगदुपादानाऽविद्याखिलाधिष्ठानत्वेन कारणत्वोपचारात् अत एवोक्तं परमान
न्दमिति न तत्र दुःखलेशोऽप्यस्तीत्यर्थः व्यापकत्वं चास्य सर्वाधिष्ठानत्वेनैव रज्जुवद्बोध्यम् यथा कल्पितसर्पा
देः सर्वात्मना रज्जोरेव व्यापकत्वं तद्वदित्यर्थः उद्धवार्जुनप्रभृतीनामुपदेशद्वारा साक्षात्परंपरया वा सर्वलोकानामुपदे

[illegible]त्वमीश्वरस्यैव संभावयितुमाह उपदेष्टारमिति २

१

अ० २ अथ वर्णाश्रमयुक्तमपि कर्म ज्ञानसाधनं दर्शयितुमाह स्ववर्णाश्रमेति ननु कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते तस्मात्क
र्म न कुर्वन्ति यतयः पारदर्शिन इति स्मृत्यनुशासनात् बन्धकत्वमपि सर्वकर्मणां श्रूयते न कर्मणा न प्रजया धनेन त्या
गेनैके अमृतत्वमानशुः इत्यादिश्रुत्यापि निषिध्यते च तत्कथं विरोधमपि दर्शयति नहि तमस्तमसो निवर्तकं दृष्टमिति चेन्नत्रा
हंकारार्थं क्रियमाणानि तावत्कर्माणि तत्त्वशुद्धये भवन्ति फलाभिसन्धिपूर्वकसाहंकारेण कृतानां बन्धकत्वं च संभव
ति तथा चोक्तं यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः तदर्थं कर्म कौन्तेय मुक्तसंगः समाचरेति न कर्मणामनारंभान्नैष्क
र्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति कर्मणैव हि संसिद्धिमास्थिता जनकादयः इति संसिद्धिशब्देनान्तःकरण
शुद्धिरित्यर्थः ननु कर्मणा विनैव विदुरादीनां ज्ञानोत्पत्तिदर्शनात् अस्मिन्नेव जन्मनि कर्मावश्यकत्वनियमाभावोऽस्तु अत ए
वोक्तं अस्मिन्न जन्मनि जन्मान्तरे वा इति चेन्न पूर्वजन्मकृतकर्मकल्पनात एवोपपद्यते यद्यस्मिन् जन्मनि वैराग्यादि पुंसा

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ३

न साधनेषु विशेषेण प्रवृत्तिर्दृश्यते तथा साधने प्रवृत्त्यन्यथानुपपत्तिप्रसूतचित्ता पूर्वापत्या कल्पना युज्यते यदि शब्दादिविषयेष्व
विशेषेण प्रवृत्तिदर्शनं न वैराग्यादिषु तदा पूर्वजन्मकृतकल्पना सर्वथानुपपन्ना भवति कार्यदर्शनेनैव कारणकल्पना भवती ४
ति न्यायात् नित्यनैमित्तिकादिकर्मानुष्ठानेन विनैव कृतार्थोऽहमस्मीति अभिमानमात्रेण हृष्यन्ति दैवात्ते दर्शयति मूलमूलका
रः कुशला ब्रह्मवार्तायामतिरयेन न शाम्यन्ति अस्य यस्यामतं तस्य मतं मतं यस्य न वेद सः कर्मणामावश्यकत्वे प्रमाणमाह तमेतं वेदा
नुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतिः न ह्युपायेन विना उपेयप्राप्तिर्भवति तस्मात्साधनमि
त्युत्तमपुरुषेण कर्मावश्यं कर्तव्यमिति अत उक्तं साधनं प्रभवेत्पुंसामिति अधुना ईश्वरतोषणमपि ज्ञानाङ्गमिति दर्शयति [illegible]
षणात् एतदर्थं भागवद्वाक्यमपि प्रमाणयति यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इति वसि
ष्ठेनोक्तं संमतमप्याह यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् तावन्न सद्गुरुं कश्चित्सच्छास्त्रमपि नोपलभेदिति तस्मादीश्वरप्रसादोऽपि हि

टी

ननु पुरुषार्थशब्देन धर्मार्थममोक्षादीति चतुर्णां ग्रहणसंभवात् कथं ममैतेनैव प्रयत्नैः साफल्यमिति न । त्राह अपरोक्षानुभूतिरिति । सूचितानुबंधचतुष्टयप्रकाशनार्थं पूर्वशंकानिराकरणव्याजेन श्लोकं व्याचष्टे धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः न स पुनरावर्तत इति श्रुत्या मोक्षस्यैव नित्यत्वावधारणात् इतरेषां त्रयाणां अन्यत्वेन यथेह कर्मचितो लोकः क्षीयते न ।

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः २

यागमतोऽपि जन्यत्वाविशेषात् शास्त्रविषयजीवब्रह्मैक्यप्रदर्शनार्थमाह मोक्षसिद्धय इति साधनचतुष्टयसंपन्नोऽधिकारीति प्रदर्शनार्थमाह प्रोच्यत इति प्रयोजनं तु मंगलस्य पूर्वश्लोके एव दर्शितं परमानन्दमिति तस्मान्मुमुक्षोः प्रयत्नैरेव साफल्यं न त्वितरेषां नैवं पुरुषार्थत्वं तेषामौपचारिकं न वस्तुत इत्यर्थः ।१।

पूर्वं तत्प्राप्तेषु स्वर्गादिविषयेषु नास्थात्यागरूपं वैराग्यमुक्तं अधुना प्रारब्धवशात्प्राप्तेष्वपि विषयेषु प्रीत्यभावरूपामुपरतिमाह विषये
भ्य इति स्रक्चन्दनवनितादिविविधविषयभोगप्राप्तेष्वपि हि मनसा आवेत्यर्थः सहनं सर्वदुःखानामध्यात्माधिभौतिकाधिदैविकादीनां
प्राप्तेष्वपि दुःखचिन्तनाभावलक्षणा तितिक्षा शुभा मता अभिप्रेतेत्यर्थः ७ अथ श्रद्धालक्षणमाह निगमाचार्येति गुरुवेदान्तवाक्येषु विश्वास इदं सत्यमे
वेति निश्चयः श्रद्धेत्यर्थः तत्पदलक्ष्यार्थे शुद्धचैतन्ये चित्तवृत्तेरेकाग्रीकरणं समाधानं सविकल्पकसमाधिरेवेति फलितार्थः
ज्ञानत्वान्तरेण यमितित्रयाणामेव स्फुरणसंभावादिति भावः एतेन पूर्वपूर्वसाधनेनोत्तरोत्तरसाधनोपयोगिता प्रदर्शिता तस्मात्स
र्वेषामपि साधनानामेकस्मिन्नेवोपसंहारो ज्ञातव्य इति भावः ८ अथ मुमुक्षुत्वलक्षणमाह संसारबन्धनिर्मुक्तिरिति अने
कशुभाशुभजन्मनामालयो संसारो य एव हि बन्धः तस्य संसाररूपस्यात्यन्तिकी निवृत्तिः केन साधनेन वा कस्मिन्काले वा मम स्या

विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ७ निगमाचार्यवाक्येषु भक्तिः श्रद्धे
ति विश्रुता चित्तैकाग्र्यं तु सल्लक्ष्ये समाधानमिति स्मृतं ८ संसारबन्धनिर्मुक्तिः कथं मे स्यात्कदा विधे इति या सुदृढा
बुद्धिर्वक्तव्या सा मुमुक्षुता ९ उक्तसाधनयुक्तेन विचारः पुरुषेण हि कर्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता १०
नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः यथा पदार्थज्ञानं हि प्रकाशेन विना क्वचित् ११

दिति निश्चयवसायिनी या बुद्धिः सा मुमुक्षुता ज्ञातव्येत्यर्थः ९ उक्तस्य साधनकलापानन्तरं तेनैव साधनवता पुरुषेण हि विधं
आवरणनाशकं परोक्षापरोक्षज्ञानं तस्य सिद्ध्यर्थं कर्तव्यो विचार इत्याह उक्तसाधनयुक्तेनेति आत्मनः स्वस्य शुभमिच्छता
मोक्षप्राप्तिमिच्छता पुरुषेणेत्यर्थः १० विचारो कर्तव्य इति प्रतिज्ञायाः सफलीकर्तुमाह नोत्पद्यतेति यथाग्न्यादिप्रकाश
मन्तरेण घटपटादिपदार्थानां ज्ञानं सत्यपीन्द्रियगणे न भवत्येवं तथा श्रवणपूर्वकं श्रवणमनननिदिध्यासनमन्तरेण व्यात्म
नः परोक्षापरोक्षज्ञानं न भवतीति अन्यसाधनैर्नाम योगप्राणायामादिसिद्धिप्राप्तिसाधनैरपि तत्त्वज्ञानासंभवमेवेत्यर्थः न
हि कं लयविक्षेपकषायरसास्वादनमित्यादिविघ्नान् इदन्त्वप्राप्येयानि साधनानि ते प्रत्युत विघ्नानीति भावः ११

नि॰

न्यसाधनानि वैराग्यादि स्वरूपेण दर्शयति ब्रह्मादिष्विति ब्रह्मलोकादिचतुर्दशलोकविषयसंबंधिकेषु सर्वेषु वैराग्यं वैतृष्ण्यमित्यर्थः
ननु ज्योतिष्टोमेन स्वर्गकामो [illegible] यजेतेत्यादिश्रुतिप्रामाण्याय ब्रह्मलोकसुखमपि पुरुषार्थः स्यादिति चेन्न आगमापायि नि
पा॰ त्वेनानित्यत्वात् तदुक्तं गीतासु मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत तत्र प्रमा
णमाह क्षीणे पुण्ये मर्त्यलोकं विशन्ति प्रव्रजेत्यरुनो हाहाः परं वै तत्प्रमाणमित्यादिश्रुतेः ननु तर्हि स्वर्गश्रुतेरप्रामाण्यमसत्यस्वर्ग
विषयत्वाद्विरोधत्वाच्चेत्याशंक्याह अन्तःकरणशुद्ध्यर्थं विहिता यागादिक्रिया अत्र प्ररोचनार्थाय दर्शयते स्वर्गादिफलमित्यवि
रोधः ननु फलत्वान्नित्यकर्मणामन्तःकरणशुद्धेरतत्तात्पर्याद्भिन्नफलानां नकाम्यकर्मणां फलान्तराविरोधात् कथं शुद्ध्यर्थ [illegible]
नेति चेन्न कर्मणा पितृलोक इति श्रुतेर्नित्यानामफलत्वासिद्धेः संयोगपृथक्त्वन्यायाच्च संस्कारार्थत्वाविरोधात् तदाह उभयत्रिवाक्य

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलं ४ नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगं
एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ५ सदैव वासनात्यागः शमोऽयमिति शब्दितः निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ६

विहितानि तावत्कर्माणि तेषां च फलाकांक्षावस्थायामधिकारिविधान्तरप्रवृत्तिर्वचनेनेत्यादिफलविधायकवाक्यप्रवृत्तेः त
स्य च ब्रह्मानन्दकामो यागादीननुतिष्ठेदित्यर्थः ४ वैराग्यहेतुमाह नित्येति अयमात्मा ब्रह्मेत्यादिश्रुतिभ्यः आत्मा
नित्यत्वनिश्चिते सति तदन्यदखिलमनित्यमित्यर्थः ५ अथ शमादिषट्कविवक्षायां तावत् शमदमयोर्लक्षणमाह
सदैवेति परमपुरुषार्थमोक्षस्यान्तरंगसाधनश्रवणाद्यभ्यासेनान्तरिन्द्रियेण मनसा नैरन्तर्येण वासनात्यागरूपः
शमः तथैव बाह्येन्द्रियाणां श्रोत्रादीनां श्रवणाद्यभ्यासेन शब्दादिविषयेषु प्रीत्यभावो दम इत्यर्थः ६ ओम् ॥

अथ विचारस्वरूपमाह कोहमिति उक्तसाधनचतुष्टयसंपन्नेन प्रमातात्मधिकारी समित्पाणिः सन् परमकारुणिकं सद्गुरुमुपसन्न पृच्छति
अत्यन्तकोहमहंकारस्य दनया लोकप्रसिद्धः अयं वेदंकारदृ नाम कथं जातं उपादानकारणं किं अयं च प्रपंचः किंकर्तृकः इति प्रश्न
चतुष्टये कृते सति पतत् गुरूपदेशसामर्थ्यात् शास्त्रपरिष्कृतज्ञानरूपविचारेण स्वस्मिन्नेव दर्शयन् अन्यवादिनां मते अभिमतानामहंका
रस्यदनां संक्षेपेण निषेधयन्नाह १२ सत्यपि वस्तुनि नास्ति न भातीति तन्न सामर्थ्य मज्ञानमसत्वापादकमावरणमित्युक्तं ते
ता न शक्यं अपरोक्षापरोक्षज्ञानमेव तदुक्तं परोक्ष ज्ञानोत्पत्तेः सत्वादि निहन्ति अपरोक्षधियां नश्येद् भानावृति हेतुता इति तस्मा
त्तयोः परोक्षज्ञानमात्मन्यादौ प्रदर्शयति नाहं भूतेनिभूतेंद्रियसमुदायः स्थूलसूक्ष्मप्रपंचानाहं तस्य सुषुप्तौ लयदर्शनेनानित्य
त्वजन्यत्वरूपवत्व जडत्व परिच्छिन्नत्वादिभिरनात्मत्वदर्शनात् दनोदे हादिकमहं न भवामि किं तु तद्भावाभावज्ञानाधिष्ठानत्वाद्धि

कोऽहं कथमिदं जातं को वै कर्ताऽस्य विद्यते उपादानं किमस्तीह विचारः सोऽयमीदृशः १२ नाहं भूतगणो देहो नाहं चाक्षगण
स्तथा एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः १३ अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते संकल्पो विविधः कर्ता विचारः सोऽय

है विलक्षणः कश्चिदहमिति इदंकारस्य दृश्यात् अनात्मभ्यो विलक्षणोऽहंकारस्य देहमिति सामान्यज्ञानेन तु विशेषज्ञानं इत्यर्थः १३
इदानीमावरणविक्षेपशक्तिकमज्ञानमेव हि आकाशादि चराचरात्मक कल्पितैकरूपप्रपंचस्योपादानमिति दर्शयन्नाह अज्ञान
प्रभवमिति यथा सतोऽजनि नैवमसतोऽपि जनिर्न च जन्यत्वमेव जन्यस्य शाश्वतिकत्वसमर्थकमिति युक्त्यापि प्रपंचस्य सर्वस्याविद्या
कार्यत्वं प्रसाध्य श्रुत्यापि तदेव तदेव दर्शयति मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् अजामेकां लोहितशुक्लकृष्णां बह्वीः
प्रजाः सृजमानां सरूपामित्यादिश्रुतेः इदानीमाह अविद्याया यथा स्वप्नेन्द्रियादिष मादाय स्वाप्रक यदर्थाकारेणानन्तद्वाना
कारेण च युगपदेव परिणमते तथैव पूर्वपूर्वजीवकर्मप्रयुक्ता सती निखिलजगदाकारेण तद्वानाकारेण युगपदेव परि

श्लो० ४ ण्यसेन कृत्स्नविद्याकार्यत्वप्रपंचस्य युक्तमित्यर्थः ननु ब्रह्मकार्यमपि प्रपंचस्य श्रूयते यतो वा इमानि भूतानि जायंते तस्माद्वा
एतस्मादात्मनः आकाशः संभूतः सदेव सोम्येदमग्र आसीदित्याद्याः तन्मात्र स्यात् श्रुतिस ततो कथमज्ञानकार्यत्वमेवे
ति चेन्न सर्वव्यवहाराणामास्पदं सर्वधर्मविनिर्मुक्तमस्थूलमनण्वह्रस्वमदीर्घम् अपूर्वमनपरमित्यादिश्रुतिभिः शुद्धब्रह्मणः कार्यकारणाभा वमि
वाभिधानात् नहि ब्रह्मकारणश्रुतीनामप्रामाण्यमापातीति चेन्नत्राह ब्रह्माज्ञानाज्ञानजन्मब्रह्मणः कारणत्वेन । अधिष्ठान
त्वमात्रेण कारणं ब्रह्म गीयते प्रपंचोपादानमविद्याधिष्ठानत्वेन ब्रह्मणः कारणत्वमौपचारिकं एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुति
सिद्धं अद्वैतप्रतिपादनार्थत्वेन च ब्रह्मकारणश्रुतीनां प्रामाण्यमेव कार्यकारणयोरभेदात् अन्यवादिपरिकल्पितमायापरमा
ण्वादिकारणांतरनिषेधपरत्वमपि ब्रह्मकारणवाक्यानामित्यविरोधः नन्वज्ञानं किमेकमनेकं वा इति विवादे एकमेवेति चेन्न
न ह्यज्ञानैकत्वे प्रपंचवैचित्र्यं न स्यात् कारणवैचित्र्याभावे कार्यवैचित्र्यानुपपत्तेः अतः कारणवैचित्र्यमपि कार्यविचित्रतया प्रोक्त
कल्पितं अन्यथा एकेनैव प्रमात्रावच्छिन्नचैतन्याज्ञानेन नष्टेन तादृशे नीतये वृद्धाः स्युः अज्ञानैकत्वे श्रुतिविरोधमपि दर्शय
ति इन्द्रो मायाभिः पुरुरूप ईयते न चैकत्वेऽपि व्योमादिवदस्यापि नाशो येन एकेनैव घटादिज्ञानेनाज्ञाननाशे तत्कार्यनिरस्ता प्रत्यगा
दिसिद्धं ततो नन्वनेकत्वप्रसंगः स्यात् तस्मादज्ञानैकत्वमिति सत्यां संगतिर्येन्न मायां तु प्रकृतिं विद्यात् देवात्मशक्तिं स्वगुणैर्नि
गूढां अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतिभ्यः मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति सत्यं ज्ञानानेकत्व
मेव सिद्धवान् युक्तिभिरपि न दर्शयति यथैकस्यैव रज्ज्ववच्छिन्नचैतन्याज्ञानस्यानेकविधमालाधारसर्पदंडा
दिवस्त्वे जनकत्वं यथा वा एकस्यैव निद्रादोषस्यानेकगजतुरगादिप्रपंचरचनोपपादकत्वं स्वप्ने दृष्टं तथाकाशादिप्रपंच
रचनोपपादकत्वमेकस्यैव विचित्रशक्तिकस्याज्ञानस्य संभवतीति निश्चितं इन्द्रो मायाभिरिति श्रुतिस्तु मायाशक्तिपरा
शक्तिशक्तिमतोरभेदात् शक्तीनां मायाधर्मत्वेन मायाशब्देनोपपत्ते । वशी एक इतीदं सर्वविद्याश्रयणादन्नित्वनियमात्

पुनरेतादृशस्याज्ञानस्य बाधकं यदात्माभेदज्ञानं तद्दर्शयति ज्ञानेन त्वविलीयत इति ननु यथा जाग्रद्बोधेन स्वप्नभ्रमनिवृत्त्यावपु
पादानानिवृत्त्या पुनरपि प्रपंचस्योदयो ऽपि वेति चेन्न ब्रह्माभेदज्ञानेज्ञाते ऽज्ञानतत्कार्योभयबाधिते पुनरनुत्पत्तिलाभात् कथं समूलप्र
पंचबाध इति चेत्तत्राह सर्वथावर्त्तिविज्ञानात्मस्वरूपेण ऽध्यस्ततत्त्वं कालत्रयेपिनास्तीति योनिश्चयः स एव समूलप्र
पंचस्य बाधकस्तथा सुरेश्वरः तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः अविद्यासहकार्येण नासीदस्ति भविष्यति ने
ह नानास्तीति श्रुत्यापि निष्पन्नोपाधौ निषेधप्रतियोगित्वमनिर्वचनीयत्वमिति संप्रदायविदां लक्षणमपि सामंजस्यं तस्मा
त्सत्यं ज्ञानमनंतं ब्रह्म ऽयमात्मा ब्रह्म एकमेवाद्वितीयं तत्त्वमसीत्यादिवाक्यब्रह्मात्मैक्यज्ञानेनाज्ञानतत्कार्यस्याकाशादि
प्रपंचस्य कृत्स्नस्य बाधो युक्त एव ननु कथमज्ञानबाधकत्वं ज्ञानस्य विरोधादिति चेन्न तर्हि तयोर्विरोधमपि वाच्यं तत्किमेक
ध्य कालेस्थानुमशक्यत्वमुतैकदेशभवनमशक्यत्वमाहोस्विद्वध्यघातकत्वं भावाभावात्मकत्वं वान्याद्यः अन्यादिसिद्धज्ञानेवा स्य
ऽज्ञानस्याज्ञानेन सहैककालावस्थानस्य वक्तुमशक्यत्वाद्युक्तैव बाधकत्वमभ्युपेयत्वात् ज्ञानोत्पत्त्यनंतरं तत्वज्ञानस्य बाधः अन्यथा
ज्ञानस्यानिवृत्त्याभावादेव्यर्थी ज्ञानेन ज्ञाननिवर्त्तिते ज्ञानेरेकेणानिश्चयोनास्तिमात्रस्य च आत्मस्वरूपत्वेन नित्यत्वात् तस्मा
ज्ज्ञानाज्ञानयोरेककालावस्थानसंभवत्येव न द्वितीयः भिन्नाधिकरणयोर्ज्ञानाज्ञानयोर्विरोधाभावेन मऽरघटवदे
ब कदेशास्थितेरप्यत्यवक्तव्यत्वात् तृतीयवध्यघातकत्वभावः यत्कर्तृकत्वं घातकत्वं सर्पनकुलयोर्हि वध्यादिद्वन्द्वस्य त्र यदार्थः कश्चि
त्तन दृष्टांतस्मिंकवा ऽपायेवध्यस्य ध्वंसानस्थान्न हि समवहिंस्थायोरिव परस्परमसंबंधात् तृतीयेन विद्यास्वरूपेणाऽवि
द्यात्यादिकेवेत्तिकुतो विरोधः न चतुर्थः ज्ञानाज्ञानयोरुभयोरपि भावरूपत्वात् अज्ञाने प्रागभावरूपत्वस्य निरस्त
त्वात् अन्यथाऽपि एककालास्थानेनस्थान्न तस्माद्विद्याविद्ययोर्विरोधो निर्वक्तुमशक्यत्वात्कथमज्ञानबाधकत्वं ज्ञा

बा बाध स्य द्वितीय

तस्य स्वप्रबाध्यज्ञानबाधकत्वमज्ञानस्यैव किं न स्यादिति चेन्न ज्ञात उपमर्दस्वभावत्वमज्ञानस्य विरोधितानवच्छेदकत्वेन ज्ञानस्य प्रका
उ० ५ शनमसौरिव यद्यपि विरोधांतरमिह निर्वक्तुमशक्यं तथापि उपमर्द्योपमर्दकभावलक्षणो विरोधः शक्यत एव निर्वक्तुमिति स्व
ज्ञानोपमर्दकत्वस्य ज्ञानस्वभावस्यान्वयव्यतिरेकाभ्यां लोकप्रसिद्धत्वात् प्रकाशतमवत् न च विरोधिताविशेषे ज्ञानोपमर्द
कत्वमेवाज्ञानस्य किं न स्यादिति वाच्यम् तथा सति ज्ञाने नान्यनिरोधत्वस्यादुपमर्दकस्याज्ञानस्यानादित्वेन पूर्वमेव स्थितत्वा
त् प्रतिनियतस्वभावस्य पर्यनुयोक्तुमशक्यत्वाच्च न च तत्र विपरीतशंकापि दृष्टविरोधात् न च वध्यघातकपक्षोक्तदोषप्र
सक्तिः उपमर्दनस्य कालत्रयेऽपि प्रपंचो नास्तीति प्रत्ययस्य प्रमितिरूपस्य बाध्यापर्यायस्य चरमवृत्त्यनन्तरं जायमानत्वात् ननु किमिद
मुच्यते ज्ञानबाधश्चरमवृत्त्यनन्तरं जायते इति यतो ज्ञानप्रागभावस्याज्ञानस्य ज्ञाने जाते स्थातुमशक्यत्वात् यथा तत्र घटादेः प्र
ागभावेन विद्यते तद्वज्ज्ञाने जाते सोऽपि ज्ञातुमशक्यमेव कथं तयोरुपमर्द्योपमर्दकत्वस्वभाव इति चेन्न विज्ञान [illegible]
मानन्दं ब्रह्मेत्यादिश्रुत्या ज्ञानस्य नित्यत्वेन तत्प्रागभावानुपपत्तिरुक्तत्वात् अन्यथा प्रतियोगिज्ञानाज्ञानाभ्यां व्याघातापत्तेश्च
प्रागभावज्ञाने प्रतियोगिज्ञानं कारणमिति न्यायात् ज्ञानस्य नित्यत्वेनात्यंतसंभवेऽपि तत्त्वमस्यादिवाक्योत्थसाक्षात्का
रः स एव सोपादानकप्रपंचस्य बाधः कल्पितसर्पाभावो रज्ज्वा रेवेत्यर्थः तथा चोक्तम् रत्नावल्यां ब्रह्मानन्देन भगव
ता दृश्याधिकरणे तत्त्वेऽदृश्याधिकरणत्वेऽपूर्वत्वानाधिकरणत्वं दृश्योच्छेदः तदन्तरत्वस्याप्रसिद्धत्वात् [illegible]
नापि हेतोरापत्तिः स्वाध्यस्तानानतिरेकेण तदभावस्याधिष्ठानस्वरूपत्वादित्यर्थः ॥ १४ ॥ ओम् ॥ ॥ ॥ ॥ ॥

घटः अथैतद्दृश्यैर्विज्ञानेन नाश्यं तद्दृश्यज्ञानेन नाश्यमिति नियमात् ज्ञानाज्ञानयोः समानाश्रयविषयत्वं तत्र दृष्टान्तार्थमाह
एतयोरिति पूर्वोक्तमुपमर्द्योपमर्दकस्वभावत्वं ज्ञानाज्ञानयोर्दृढीकर्तुमेतयोरिति पदं यदुपादानमिति पदं विवर्ताधिष्ठानत्वे
नोपादानत्वप्रदर्शनार्थं सजातीयविजातीयस्वगतभेदापनुत्तये एकमिति पदं औपाधिकमहन्त्वनिरासार्थं सद्रूपमिति पदम्
असत्त्वजन्यत्वादिनिराकरणार्थं सदिति पदम् अव्ययपदव्यावृत्त्यस्थूलसूक्ष्मकारणशरीरत्रयनिरासार्थं अव्ययमिति पदं परिणा
मपक्षनिराकरणार्थं विवर्तमंगीकरोति यथैवेति यथा मृद्घटादीनां मृदादिविवर्तत्वं तथा तयोरपि ब्रह्मविवर्तत्वमित्यर्थः १५ पूर्व
निराकृतानां पुनरपि स्थूणानिखननन्यायेन निराकरोति अयमेकोपीति संशयविपर्यय सहणात्मका विद्यात्रयनिरासा

एतैर्यदुपादानमेकं सद्रूपमव्ययम् यथैव मृद्घटादीनां विचारः सोयमीदृशः १५ अयमेकोपि सद्रूपः
ज्ञातासाक्षी सदव्ययः न देहेन्द्रियसंघातो विचारः सोयमीदृशः १६

र्थं नित्यनिर्दुष्टत्वं तत्त्वमस्यादिवाक्योपदेशे न त्वहंदहहल्लक्षणग्राह्यग्राहकमहं ब्रह्मास्मीत्यपरोक्षज्ञाने अप्रमाणावरणा
शंकस्थानभवेन दृढीकर्तुमाह न देहेन्द्रियसंघात इति ननु तत्त्वमस्यादिवाक्यजन्यज्ञानस्यापरोक्षत्वं न संभवति शब्दप्रमाणज
नितत्वेन तस्य परोक्षैकरूपत्वसंभवात् इन्द्रियजन्यस्यैव ज्ञानस्यापरोक्षत्वात् न चापरोक्षस्वरूपे आत्मनि तत्त्वमस्यादि
शब्दस्यापरोक्षज्ञानजनकत्वमेव युक्तं प्रमेयानुसारित्वात् प्रमाणस्वभावस्येति वा करणस्वभावस्यान्यथाकर्तुमश
क्यत्वात् अपरोक्षयोरपि वृक्षादौ शब्दादिना परोक्षज्ञानस्यैव जननाच्च न चापरोक्षमपि ज्ञानमभ्यस्यमानमपरोक्ष

अप ६ त्वं संभवतीत्युक्तं अनुमित्यादौ तथादर्शनात् तत्रापरोक्षज्ञानस्यापि शाब्दत्वाविशेषात् तस्माद्वाक्यजन्यत्वादेव तस्यापरोक्षत्वं
संभवति यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्यादिना तस्यात्मनो वागविषयत्वात् कथं तत्त्वमस्यादिवाक्यमात्मन्य
परोक्षज्ञानं जनयितुमलमिति चेन्नाह अगामस्यैवात्मनोऽपरोक्षज्ञानजनकत्वसंभवात् तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुत्या
वात्मन्यौपनिषदविशेषणश्रवणात् । चेतराविषयत्वे तन्मात्रविषयत्वे सति तन्मात्रविषयत्वेन सामञ्जस्ये अन्यथापन्यत्राव्या
वर्तकत्वे विशेषणवैयर्थ्यात् लौकिकस्यापि वाक्यस्य दशमस्त्वमसीत्यादेरात्मन्यपरोक्षज्ञानजनकत्वस्यैव दृष्टत्वा
त् न च तत्रेन्द्रियं करणं संभवति तस्यापि तस्मिन् दशमत्वापरिज्ञानात् तद्व्यतिरेकेणांधनमसि वा वाक्यादेव दशमोऽस्मीति सा
क्षात्कारदर्शनात् ततो व्यभिचारान्नेन्द्रियाणामात्मसाक्षात्कारे करणत्वे एवकारार्थः किं तदपरोक्षत्वमिति चेत् वस्तुतः प्रमा
त्रव्यवहितत्वमेव तत्प्रमातरि विश्रान्तं यथा च यावत् यावत् प्रमातुर्विप्रकृष्टत्वेन तावत्तावत्परोक्षत्वोत्कर्षदर्शनात् तस्मा
यस्मात्स्वापरोक्षत्वात् तद्ब्रह्म तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिश्रुतिसिद्धापरोक्षस्वभावे प्रत्यगात्म
न्यपरोक्षज्ञानं यत्र यत्र वेद्यमानमेव जनयेदन्यथा स्थितस्यान्यथा बोधनात् ननु नैयायिकमते आत्मनो मानसप्रत्य
क्षसिद्धत्वात् कथमौपनिषदत्वमेव यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुतिस्तु संस्कृतमनोनिषेधपरा इति चेन्न
स्वप्नादौ मनसोऽपि व्यभिचारित्वेन व्यभिचारिकरणजन्यतया साक्षात्कारस्याप्रामाण्यप्रसङ्गः न च वेदमूलतया प्रामा
ण्यं अपरोक्षतया वेदेनानवबोधनात् काऽज्ञानसाक्षीति श्रुतिव्याकोपश्च न चासंस्कृतमनः लौकिकवाक्यविषयत्वमेव नि
षेधश्रुतेरिति वाच्यं मुख्यस्य बाधकाभावात् मुख्यसंनिबाधके लक्षणासंभवति नान्यथा न च श्रुतिविषयत्वेऽपि स ६

मानोदेव इति वाच्यं लक्षणयैव तत्त्वबोधनात् ननु तत्त्वमस्यादिवाक्ये लक्षणैव युक्ता भागलक्षणयैकदेशपरित्यागे ऽनन्यार्थपरित्या-
गप्रसंगः नच पदयोरेकविभक्तिनिर्दिष्टयोः सामानाधिकरण्यपरामर्शानंतरं पदार्थयोरभेदो वाक्यार्थस्तावदवगम्यते सच
विरुद्धस्वभावयोर्जीवपरमात्मनोः संसार्यसंसारिणोर्न संभवतीति मुख्यार्थानुपपत्त्या लक्षणायुक्तैवेति सोऽयं श्रुतिसिद्ध-
ऽर्थेऽनुपपत्त्यभावात् नच भेदग्राहिप्रत्यक्षादिविरोधेन लक्षणैव वाच्यं श्रुतिविरोधेन भेदग्राहिप्रत्यक्षादेरप्रामाण्यापातात् । ति
श्रम्यालक्षणयाप्येवमेकार्थानतिप्रेतप्रत्यक्षादिविरोधसद्भावात् तथाप्येवमर्थानानुपपत्ति नच शक्यलक्ष्ययोः संबं-
धः लक्ष्यस्यात्मनोऽसंगत्वेन संबन्धाभावात् न चासंगेन केनचित्संबध्यते न चासंबद्धो लक्ष्यते तस्यादर्शनात् नच स-
१ र्वथाऽनभिधेयोर्थो लक्षणेति दृष्टं लक्ष्यपदार्थमूकत्वापि स्यात् तत्रापि लक्षणायां लक्षणानवस्थाप्रसंगः शिवः सर्वल-
हेयोपस्थापकपदे लक्षणयोपस्थापनेते तत्त्वोपस्थापकपदेनापि भवितव्यत्वात् किंच पदाभ्यामेकोर्थो लक्ष्य-
ते ऽर्थद्वयं वा नाद्यः एकपदवैयर्थ्यप्रसंगात् पदार्थवाक्यार्थयोरविशेषापत्तेश्च विशेषे वाऽन्वयत्वेऽवाक्यार्थत्वस्या-
त् अतएव न द्वितीयः लक्षणाभावप्रसंगाच्च नहि विरुद्धयोरभेदानुपपत्त्या लक्षणाभिन्नयोरभेदः प्रतीयते स्थिति-
भिन्नार्थत्वात् किंचैवं तत्त्वमस्यादिवाक्यमेव प्रधानं इतरत्सर्वं तदुपकरणमेव तथा च प्रधानवाक्ये कथं ल-
क्षणा तत्रासमवेतार्थत्वेनेतरत्रैव सा युक्ता गुणे त्वन्याय्यकल्पनेति न्यायादिति चेन्न विरुद्धयोरभेदो हि वेदेन प्रती-
यमानत्वात् अनन्यगतिकत्वेन मानान्तरस्य बाधने यदुक्तं मुख्यार्थानुपपत्त्यभावान्न लक्षणेति तन्न विरुद्धस्वभावयो-
र्जीवपरमात्मनोरभेदस्य प्रमाणबाधितत्वात् नहि विरुद्धयोरभेदः क्वचित्प्रमाणेन दृष्टः नच मानान्तरस्य वेदेन
बाधितत्वान्नानुपपत्तिरिति वाच्यं नहि बाध्यमित्येव बाध्यते किंतु स्वविषयासिद्ध्यन्यथानुपपत्त्या दृष्टं तु भेदं

न्या० तेरणापि तदनुपपत्तेः तस्मान्मुख्यार्थानुपपत्तिरेवान्यथा सर्वत्र लक्षणोच्छेदप्रसंगः यत्र कुत्रैतादृशवाक्याविरोधेऽपि
२ रुध्यमानानंतरस्य बाधितत्वात् अनुपपत्त्यभावान्न लक्षणा स्यात् न च लक्ष्यार्थस्यासंगततया वाच्यार्थेन संबंधा
नुपपत्तिः स्वतोऽसंगस्याप्यविद्यातः करणाद्युपाधिसंसर्गस्याविद्याध्यारोपितस्य दिवोध परिकल्पितसंवित्तान
संसर्गवदुपपत्तेः ननु कल्पितसंबन्धेन लक्षणा पारमार्थिकी न स्यादिति चेन्नाद्वैतवीच्यं द्वैतेन विरोधेनैव द्वैता-
सत्यत्वेऽप्यद्वैतवादिनां सिद्धांताविरोधस्यातिस्पष्टत्वात् न च तदर्थे लक्षेऽमुकताप्रसंगस्तत्पदार्थस्य लक्ष्य
विज्ञानमानन्दं ब्रह्मेत्यादिनैव प्रतिपादितत्वात् न तत्र च लक्षणाभावान्नानन्दस्येति त्वमर्थस्तु साक्ष्यादिपदेन
वक्तुं शक्य एव साक्षी चेता केवलो निर्गुणश्चेति श्रुतेः न च पदयोरेकानेकार्थत्वे विकल्पावकाशः एकार्थेऽपि वाक्यत्वा
वि न्यस्यैव ज्ञानस्य भेदभ्रमनिवर्तकत्वादिति न चान्यतरपदवैयर्थ्यं तेन विना विरोधाभावेन लक्षणयाप्यख
ण्डवाक्यार्थस्य प्रतिपादयितुमशक्यत्वात् पदमात्रस्य चाप्रमाणत्वात् ननु तत्त्वमस्यादिवाक्ये लक्षणैव ना
ङ्गीक्रियते न च संसार्यसंसारिणोर्जीवपरमात्मनोर्विरुद्धस्वभावत्वात्सामानाधिकरण्यानुपपत्तिरिवान्यद ति
त्वमर्थयोरिवैकस्य बाधेनापि तदुपपत्तेः न च उभयोर्मध्ये कस्य बाधः यदि परमात्मन एव बाधमाशंके
तदा शास्त्रस्यापुरुषार्थत्वं जीवपर्यवसितत्वादप्रामाण्यं स्यात् चैतन्यस्यैव ब्रह्मस्वरूपत्वात् न द्वितीयस्यैतस्य अ
मानत्वानुपपत्तेः घटवदिति चेन्न तस्यानिर्वचनीयत्वेन तदुत्तदुविलक्षणत्वात् भासतोपपत्तेः न च नी
रूपस्य चैतन्यस्य भासानुपपत्तिर्नीरूपस्यापि गगनस्य स्वच्छे जले प्रतिभासदर्शनात् रूपं रूपं प्रतिरू

यो ब्रह्म वेद इति श्रुतेश्च तथा च वाक्यजन्यज्ञानाद् ज्ञानेनन्तार्थप्रपंचस्य बाधे केवलानन्दस्वरूपः परमात्मा पर्यवशिष्य(ते)
१ नैवं किंचिदनुपपन्नमिति चेन्न बन्धमोक्षयोर्वैयधिकरण्यापत्तेर्मोक्षार्थप्रवृत्त्यनुपपत्तेश्च तस्य मोक्षार्थमन्या
यत्तेनेन चास्वनाशपुरुषार्थः न च दुःखाभावो वा पुरुषार्थः स्वस्यैव बाधितत्वात् कस्य पुरुषार्थः स्यात् न च जीवात्मा
सत्यः अनेन जीवेनात्मनेति श्रुत्या तस्य सत्यत्वेन परमात्मनाभेदश्रवणात् नान्योतोस्ति द्रष्टेत्यादिना भेदप्रतिषेधः
रूपं रूपमिति श्रुतिस्तु न तथा तत्त्वाद्याकांतं न तच्छरीरसादृश्यस्यैव प्रतिरूपपदेनाभिव्यक्तितत्वात् भवतु वा प्रतिबिंबो
तथापि न सत्यः प्रतिबिंबत्वेनैव प्रतिबिंबयोरभेदस्य ग्रहात् तस्मात् तत्त्वमस्यादिवाक्ये बाधायां सामानाधिकरण्यमि
ति कल्पनावैदवाक्यानन्यापत्त्या अखण्डलक्षणया परिपूर्णसच्चिदानन्दप्रत्यगात्मावबोधनेनानुपपन्नमिति अत उक्तं

आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परं १७ आत्मा नियामकश्चान्तर्देहो
नियम्यो बाह्यकः तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परं १८ आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचिः तयोरैक्यं प्रपश्यन्ति

तदरं तन्मसं देहो इति १९ ननु स्थूलदेहापि चेतनाधिष्ठानत्वात् सुखदुःखानुभवाश्रयत्वाच्चात्मा किं न स्यात् तदभावे सु
षुप्त्यादौ सुखदुःखानुभवाच्च इति चेन्न ज्ञाचेतनत्वोपाधिनाश्लोकपंचकेनोत्तरमाह आत्मा विनिष्कल इत्यादिना उ
पाधेः साध्यव्यापकतामाह देहो बहुभिर्नैरिंद्रियगोलकैरावृतः अस्मिन्देहत्वरूपः देहस्य चेतनत्वं स्वरूपानित्यात्वाद्यात्मास्या
न्तःकदाचिदपि तेन वियोगः स्यान्नत्र प्रसुप्त्यादौ चेतनदभावाभावप्रसंगोऽपि स्यात् तस्मात्स्वतोऽजडो ज्ञाने न प्रमा
ण चैतन्येन नाशात्म्याध्यासेन देहेन्द्रियादीनामपि अज्ञानवशात्कल्पितमनुभवितृत्वं संभवति यथा यःपिंडस्य

आ°
८ दाहकास्य दाहविनाशान्न्याध्यासेन दाहकत्वं न ब्रुटितिभावः सर्वदानुगतत्वे च तत्वं प्रमानरेणव संभवति विज्ञातारमरे केन वि
ज्ञानीयादिति श्रुतेः एतेन दृगाद्येः साधनाव्यापकत्वमपि दर्शितं ननु यदि देहादिभिन्नस्यात्मनोऽनुभवितृत्वमस्ति तदा
सुषुप्तावपि सुखदुःखाद्यनुभवः स्यात् अनुभवाश्रयस्यात्मनो विद्यमानत्वात् यदि दुःखमहमस्वाप्समिति प
दे रामर्शात् सुषुप्तावपि दुःखानुभवं कल्पेन नहि ज्ञाप्तिपेटेनमात्रेपि लज्जाणानियां स्यात् दुःखाभावेन स्यादिति चेन्न नित्य
सुखरूपस्य स्वभावस्यात्मनोऽनाद्यविद्याध्यासेन परंपरया तत्कार्यस्य सुखदुःखाश्रयस्यांतःकरणस्याध्यासे
भवेन दुःखित्वादिमानं न वस्तुतः तदानीं तज्ञानत्वाप्रकर्मोगजनककर्मनाशे सति स्थूलसूक्ष्मप्रपंचस्यापि स्वकारणे प्र
न लीनेलयदर्शनात्मनोऽनुभवितृत्वं न च सुषुप्तौ प्रपंचविलये प्रमाणाभाव शंकनीयः यदा तन्मपश्यति पश्यन्वै तन्नपश्य
त्यात्मानित्योहि सद्रूपो देहो नित्यो ह्यसन्मयः तयोरैक्यं प्रपश्यंति किमज्ञानमतः परं २॰ आत्माप्रकाशकः
स्वच्छो देहस्तामसउच्यते तयोरैक्यं प्रपश्यंति किमज्ञानमतः परम् २१ अनद्वितीयलखनायनमः
य
निद्वितीयस्याभावात् न चात्र ज्ञात्मन एव प्रमानत्वाभावेन प्रपंचाभावश्रुतिर्वाच्या नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशि
त्वादित्यादि श्रुतयः तत्प्रमानानीत्यर्थः तथा च स्वयंप्रकाशकत्वं सर्वावभासकत्वं चात्मनः सिद्धमिति तथा हि यान्यात्मकाः
दीपादयः यस्मात् नयोनतेरावतेदिवितस्मादेवइतिप्रोक्तः स्यूयते सर्वदैवतैरिति इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः
म मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः इत्यादि
श्रुतिस्मृत्यन्यः आत्मा देहेन्द्रियादिभ्योऽभिन्नोऽन्तर्यामभावस्तावत्स्वयं ज्योतिस्त्वपावस्तुनोऽस्ति अत एवाहं ज्ञात्माप्रकाशकः
स्वच्छ इति १७ १८ १९ २० २१ सर्वान्यनित्य... यास्यायशालिनेनमः १
८

नन्वग्न्यादित्यादीनां सर्वलोकप्रकाशकत्वं दृश्यते तथा च श्रुतेः सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैरिति सत्य
पि चक्षुरादिगतेऽत्रात्मनोऽनुपादितज्ञानाभावादन्वयव्यतिरेकेणादित्यादीनां सर्वप्रकाशकत्वं संभवतीति कथमात्मनः सर्वप्रका
शकत्वमित्याशंक्याह आत्मनस्तत्प्रकाशकत्वमिति यत्पदार्थावभासनं प्रकाशनं तदात्मन एव संभवतीति आदित्यादिज्योतिर्मतेरेणा
पि स्वप्नसुषुप्त्यादौ प्रकाशसद्भावात् तथा च श्रुतिः न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनु
भाति सर्वं तस्य भासा सर्वमिदं विभातीति ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यत इति स्मृतिश्च नित्यमात्मनः सर्वावभासकत्वमे
व संभवतीति नेत्यवहिः स्वयंप्रकाशोन्नामयत्नेनापि रूपेण कस्यापि ज्ञानस्य कदाचिदपि कर्मतां न भजति यतो यस्मान्निशि स्वप्नसुषु
प्त्यादौ अग्न्यादिदीप्तेरभावात् स्वप्रकाशत्वेन स्यादेघं आदित्यादीनां पारतन्त्र्यं श्रुतिरेवाह भयादस्याग्निस्तपति भयात्तपति सूर्यः
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पंचमः इति श्रुतेः २२ अपपूर्वोक्तस्याप्यनाद्यनिर्वचनीयस्याज्ञानस्य यत्सामर्थ्यं तद्दर्शयति

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यांध्यं यतो निशि २२ देहोऽहमित्ययं मूढो
धृत्वा तिष्ठत्यहो जनः ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा २३ नारायणसर्वव्यापकानन्दघनस्वरूपानमः

देहोऽहमिति मूढोऽविवेकी नित्यानित्यविवेकरहितोऽनिर्वाच्येनाज्ञानेनावृतः सन् भूतेन्द्रियसमुदाये भोगसाधने
ममायं शरीरमिति स्वाभाविकेनाज्ञानेनात्मज्ञानस्य कर्मतया ज्ञात्वापि यथा घटद्रष्टा घटाद्भिन्नः एवं स्वरूपाद्भिन्नस्य क
र्तृत्वेनैव ज्ञात्वापि पुनः शरीरोऽहं कृशः स्थूलो जीवोऽस्मि ब्राह्मणोऽस्मि शरीरेऽज्ञाने ज्ञानोऽस्मि मन्ये शरीरमेवाऽस्मीति मन्यते इत्यज्ञानसा
मर्थ्यं अत एवाहुः निर्गुणे निरुपमे ध्यापत्वं मयि चिति सर्वकल्पनातिरूपं पश्यति जगदीशतीव भेदान घटनघटनापटीयसी माये
ति तस्मादयं तत्त्वज्ञानादपि पामरः शोकमोहजरामृत्युरिति षड्भिर्यः ज्ञायते नित्यवर्जितो नित्यपूर्णानन्दघनो विकल्पयतीति षड्भावविका
काररहितो निर्विक्रिय एवात्मा सत्त्वरजस्तमोगुणत्रयवर्जितेभ्यः स्थूलसूक्ष्मकारणशरीरेभ्यो भिन्नः शरीरत्रयभावाभावसाक्षी वि
हुनेकरसो देहेन्द्रियैः नेनात्मनाभावप्रतियोगी अभावप्रतियोगी न च देहेन्द्रियादयः नेनामी नात्मनः आत्मनो धर्मप्रमावो
महीनमप्रकाशत्वात् आत्मभिन्नानां जडत्वादनात्मनां नाद्युपादकत्वासंभवात् स्वेनैव स्वभाववत्तत्कर्तृकर्मविरोधात् तदनाद्यकाले सर्वदाहेकास

अथ शास्त्राचार्योपदेशेन प्राप्तस्यात्माभेदज्ञानस्य स्वरूपमाह ब्रह्मैवाहमित्यादिपंचकेन निर्विकारत्वादिविशेषणैर्विशेषितं यत्सर्वेत्र
१० ह्यनतेर्वहमिति निवर्त्तकाद्योगीकारेण परिणामवादनिषेधार्थं निर्विकारत्वादिविशेषणं शेषस्यार्थमेव न त्वयं यद्यपि भविष्य
६ त्काले आत्मनो निर्विकारत्वमेव न पुनर्वर्त्तमानकाले अज्ञानदशायां विकारित्वं किं न स्यात् यथा घटोत्पत्तेः पूर्वं मृत्तिकाया अविकारित्वे
ऽपि यथा वा पटोत्पत्तेरनंतरं तंतूनामिति सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिसिद्धत्वात् परिणामवादस्याप्यभ्युपगमस्यादिति चेन्न परिणामि
त्वापरिज्ञानात् नात्यंतोऽन्यथाभावः परिणामो नात्यंतोऽन्यथाभावो विवर्त्तः इत्युभयोर्लक्षणवचनाच्च परिणामे सति स्वस्वरूपं नावशिष्यते
यथा दुग्धस्य दध्याकारपरिणामे दुग्धत्वं नावशिष्यते दुग्धपरिणामो वा दधिकदाचिदपि दुग्धरूपतां न भजति न तद्वदात्मन्यपि परिणामित्वा
वि ङ्गीकारे चकदाचिदपि केनाप्युपायेन निर्विकारित्वं न स्यात् अत एवात्र नासतो विद्यते भावो नाभावो विद्यते सतः अन्यथा नेह नास्तीति श्रुत्यादि
निषेधो न स्यात् तस्माद्यथा मरुदेवतो घटो मृद्भिन्नो नास्ति यथा वा तेन गगनं चैतन्याविद्याविवर्त्तो पटोऽप्यधिष्ठानभिन्नो नास्त्येव तथा सर्वाधिष्ठा
ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २४ निर्विकारो निराकारो निरवद्योऽहमव्ययः नाहं देहो ह्य
सद्रूपो ज्ञानमित्युच्यते बुधैः २५ निरामयो निराभासो निर्विकल्पोऽहमच्युतः नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २६ निर्गुणो नि
ष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः २७ निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः नाहं देहो ह्यसद्
म नस्वरूपमात्मचैतन्यविद्याविवर्त्तस्याकाशादिप्रपंचस्याप्यचेतनव्यतिरेकेणनास्त्यस्ति भविष्यतीति त्रैकालिकोऽसत्त्वमसत्त्वमिति स्थितेन
त्वर्थानार्थमाह निर्विकार इति तत्र श्रुतिमपि प्रमाणयति अपूर्वमनपरमविनाशीवारेयमात्मा अनुच्छित्ति धर्मेति असं
गोह्ययं पुरुषः न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता इत्यादि इममेवार्थमग्रेऽपि प्रतिपाद
यिष्यति मलेमल्लकारः अप्रस्तुतस्य कुतो जन्म इत्यादिना सर्वं खल्विदं ब्रह्मेति श्रुतिश्च शुद्धे ब्रह्मण्यात्मभेदात् नात्मभेदस्व
रूपभेदमिति त्रिविधभेदनिषेधपरा न तु परिणामपरा इत्यर्थः अन्यथा नेति नेतीति वाक्यविरोधेन प्रामाण्यप्रसंगः स्यात्
तस्मात्त्रिगुणमित्यर्थः २४ २५ २६ २७ २८ नारायणनमः ओम् ८

नन्वेवं प्रपंचस्य त्रैकालिकासत्वे शून्यमेवावशिष्यते इति शंकते स्वदेहमिति भ्रमप्रमाज्ञानद्वयविषययोः स्वप्नजा
ग्रत्प्रपंचयोः स्थूलसूक्ष्मशरीरद्वयाश्रितत्वं दृश्यते यत्तद्देहद्वयातीतं तच्छून्यमिति निराकारत्वात् सर्वप्राप्तेश्चा १२
पु ह स्वात्मानमिति आत्मनः प्रत्यक्षत्वेऽपि सद्रूपत्वमेव सदेव सोम्येदमग्र आसीत् सत्यं ज्ञानमनंतं ब्रह्म एक
कमेवाद्वितीयमित्यादिश्रुत्या शून्यत्वनिषेधेनात्मसत्यत्वप्रतिपादनत्वात् अत एवाह सदाकारमिति

स्वदेहं शोभनं त्यक्त्वा पुरुषाख्यं च संमतम् । किं मूर्ख शून्यमात्मानं देहातीतं करोषि भोः ॥ २९ ॥
स्वात्मानं शृणु मूर्ख त्वं श्रुत्या युक्त्या च पूरुषम् । देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः ॥

एतादृशस्यात्मनो दुर्विज्ञेयत्वं दर्शयति दुर्दर्शमिति भवादृशैर्वैराग्यादिचतुष्टयसाधनरहितैर्देहाभिमा
नवद्भिः परिपूर्णानन्दघनोऽसंगोदासीनो निरपेक्षैकरसोऽखंडोऽहमिति आत्मज्ञानं दुर्दर्शं दुःखेन दर्शयि
तुमर्हः तथा चोक्तम् क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ।
नैव धर्मी न चाधर्मी न चैवेह शुभाशुभी यः स्यादेकासने लीनस्तूष्णीं किंचिदचिंतयन्निति ३० ॐ नमः

अथ पूर्वं प्रतिज्ञातं यदात्मनो देहादिविलक्षणत्वं तद्देवदत्तरूपतया निर्देशेन पुनरपि दृढयति अहं द्रष्टेत्यादिनवभिः श्लोकैः अस्मिन्मते पदार्थो द्विविधः दृग्दृश्यं च अन्यवादिपरिकल्पितानामपि पदार्थानां षोडशादीनामत्रैवान्तर्भावात् तयोरुभयोः पदार्थयोः स्वरूपमाह तत्र दृक्पदार्थस्तावदात्मा तन्मात्रमार्ष्टिकमेव स चाप्यज्ञानोपहितानुपहितभेदेन द्विविधो व्यवह्रियते तत्र साधारणासाधारणप्रपंचोपादानाज्ञानोपाधिको जीवः स च कर्तृत्वबन्धमोक्षाधिकारी लोकप्रसिद्धः यदनुपहितं तद्ब्रह्मेति दृश्यं च सर्वप्रतीतिके [illegible] महत्तत्वान्यहंकारो बुद्धिरव्यक्तमेव च इन्द्रियाणि दशैकं च पंच चेन्द्रियगोचराः इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः एतत्क्षेत्रं समासेन सविकारमुदाहृतमित्यत्र दर्शितं यत्तु तत्र ज्ञानं तत्सर्वं प्रतीतिमात्रं प्रतीतिव्यतिरेकेण किंचिदपि न संभवति अविद्याकार्यत्वात् रज्जुसर्पवदिति तथाप्यज्ञानकालेऽव्याकृतात्मतत्त्वं त्रैभेदेन त्रिविधमेव व्यवह्रियते

अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः ममायमिति निर्देशात्कथं स्याद्देहकः पुमान् ३१ अहंशब्देन विख्यात एक एव परः स्थितः स्थूलत्वेनानतत्संप्राप्तः कथं स्याद्देहकः पुमान् ३२ अहं विकारहीनस्तु देहो नित्यविकारवान् इति प्रतीयते साक्षात्कथं स्याद्देहकः पुमान् ३३ यस्मात्परमिति श्रुत्यानया पुरुषलक्षणं विनिर्णीतं विमलेन कथं स्याद्देहकः पुमान् ३४

ते तत्र सत्त्वात्मकं प्रपंचबीजशक्तिरूपा विद्या अनादित्वेनाव्याकृतमित्युच्यते सा च स्वयं जडाप्यजडेन ब्रह्मचैतन्येन मिथ्यातादात्म्याध्यासेन पूर्वपूर्वजीवकर्मोपयुक्ता सती शब्दस्पर्शरूपरसगन्धात्मकान्याकाशवायुतेजोजलपृथिव्याख्यानि पंच महाभूततन्मात्राणि तद्द्वारा स्थूलसूक्ष्मप्रपंचकारणं भवति शब्दादिपंचकं बुद्धिमनसी प्राणादिपंचकसहितम् श्रोत्रादीन्द्रियपंचकं च एतत्सर्वं मिलित्वा सप्तदशकं लिंगशरीरमसूत्रमित्युच्यते पंचीकृतपंचमहाभूतारब्धं स्थूलशरीरं भोगायतनं भोग्यं च चतुर्दशभुवनाख्यमूर्ध्वमध्याधोभावेन सत्त्वरजस्तमोगुणप्रधानादिपदार्थ एतत्सर्वं ब्रह्माण्डाख्यमक्षरमित्युच्यते अ

१ यथोपनिषदस्सृष्टिक्रमः एतद्विपरीतो लयक्रमः तथाह आकाशादिप्रपंचस्याव्याकृतावीश्वरशक्तौ स्वकारणे लयमिति लयलक्ष
णात् सर्वस्य सृष्टिप्रलयादिकं च स्वप्नवत् सृष्टिप्रलयादिवत् पारमार्थिकमेव परे त्वधिकारिभेदेन पूर्वोक्तानां पदार्थानां कार्यकार
णभावोक्तियुक्तैव एतादृशस्य दृश्यप्रपंचस्य कथं दृष्टृत्वं सम्भवति दृश्यदर्शनायोगात् एवाह अदृष्टत्वयासि इति तथा च
श्रुतिः अदृष्टो द्रष्टा नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता विज्ञाता रमणकेन विजानीयादस्थूलमनण्वह्रस्वमदीर्घमलो

सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिके अपघ्नजेतयतः स्तुत्या कथं स्याद्देहकः पुमान् ३५ असंगः पुरुषः प्रोक्तो बृहदारण्य
केऽपि च अचलोऽयममलोऽक्लिष्टः कथं स्याद्देहकः पुमान् ३६ तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः अजडोऽपरप्रकाश्यः
कथं स्याद्देहकः पुमान् ३७ प्रोक्तोऽपि कर्मकाण्डेन ह्यात्मा देहाद्विलक्षणः नित्यश्च तत्फलं भुङ्क्ते देहपातादनन्तरं
३८ लिंगं चानेकसंयुक्तं चलं दृश्यं विकारि च अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयम् ३९

हितमशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते इत्यादि
श्रुतिसिद्धस्यात्मवादस्य तत्सिद्धं श्रुतिशब्देन दर्शितः तथोक्तं गीतास्वपि देही नित्यमवध्योऽयं देहे सर्वस्य भारत देवदेव इत्याद्या
नेयतज्ज्ञानमतं ममेति इत्यादिस्थावरान्तेषु प्राणिषु दृश्यत्वेनानित्यत्वमेवेति स्थितं ३१ अथ स्वपक्षे न विरुध्यते इत्याद्या
व्यापकमसद्रूपमनित्यं तत्र तस्य स्पष्टार्थः ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ रामायेश्वररूपाय नमः

पुनरपि स्थूलसूक्ष्मशरीरद्वयादन्यः परमात्मा सर्वानुभूय घटादीनां द्रष्टा यथा घटादिभ्यो भिन्नस्तथा प्रदर्शनार्थमाह ए
वं देहद्वयादन्य इति अत्रायं स्वयंज्योतिर्हि पुरुषः नहि ईश्वरं प्रपश्यत शरीरे घटवाश्रोनि यस्माप्युत्क्रामतीश्वरः इत्यादिश्रु
तिस्मृतिभ्य आत्मनो देहादिविलक्षणत्वमेवावगम्यते देहादीनामात्मत्वे जगद्वैचित्र्यानुपपत्तिरेवस्याद्वैचित्र्यस्याद्रष्टहेतुक
त्वाद्दृष्टस्य च पूर्वजन्मसंबंधित्वेन तदाश्रयस्यात्मना नादित्वेन नित्यत्वमेव युक्तम् अनादिभावस्य च नित्यत्वनियमात
अन्यथा कृतहान्यकृताभ्यागमप्रसंगः स्यादिति एवं चास्यात्मविवर्तत्वप्रदर्शनार्थमाह सर्वात्मा सर्वरूपश्चेति ४० नन्वा
त्मनो देहादिविलक्षणत्वेपि किं देहादिप्रपंचस्यापात्मत्वं नास्ति नत्वमनुशशविषाणवदसत्यत्वं नाद्योद्वैतापत्तेः एकमेवाद्विती
यमिति श्रुतिव्याकोपश्च नेह नानास्ति इति श्रुत्यानिषेधानुपपत्तेश्च नहि तीयः तस्यानुभूतत्वेन भेदकधर्माणामसत्त्वे नभे

एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः सर्वात्मा सर्वरूपश्च सर्वातीतोहमव्ययः ४० इत्यात्मदेहभागेन प्रपंचस्यैव सत्य
ता यथोक्तानर्कशास्त्रेण किं ततः पुरुषार्थता ४१ आत्मदेहभेदेन देहात्मत्वनिवारितं इदानीं देहभेदस्य सत्यत्वस्फुट

त्वनिरूपकत्वासंभवात् तस्मादुक्तनिरूपणाभावेन देहादीनामेवात्मत्वं किं न स्यादिति शंकते इत्यात्मदेहभेदेनेति आत्मा
देहानधुना देहस्वतनात्मज्ञमिति विभागेन प्रपंचस्यैव सत्यत्वप्रसक्तिः नैयायिकमते पृथिव्यादिनवद्रव्याणि नित्यानि परस्प
रभिन्नानि च तद्दृष्टसाधकानि च प्रत्यक्षादिप्रमाणानीति तार्किकाः संगिरंते इति चेन्न तेषामनात्मत्वमदुःखमयत्वात्तत्प
रुषार्थमिति परिहरति किं ततः पुरुषार्थतेति ४१ पूर्वोक्तस्य देहात्मविभागस्य देहात्मवादनिराकरणपरत्वेनान्यथासिद्धस्य दा
निराकरणं प्रतिजानीते इत्यात्मदेहभेदेनेति पूर्वं देहात्मवादनिराकरणार्थमविद्यात्मकत्वमनिर्वचनीयत्वं देहात्मभेदस्य
युक्तिभिर्निरूप्य अधुना तत्त्वमस्यादिवाक्यार्थदर्शनार्थमेवं चेतत्प्रसज्जानीयजीवपरमात्मभेदनिराकरणं एवं कं विजानी
यात्मात्मभेदनिराकरणं प्रतिजानीते देहात्मभेदो नात्मा नात्मविवेकः तस्याभावत्वं यथा तथा स्फुटमुच्यते ४२ आत्मा यत्न

पूर्वं प्रतिज्ञातस्यापि देहात्मभेदासत्त्वस्य प्रतिपादने हेतुमाह । चैतन्यस्यैकरूपत्वादिति । ननु कथं भेदासत्त्वं तदभावेन ज्ञानमस्यादिवा
क्यानामात्मविषयत्वं नि[illegible]स्यात् अज्ञानविषयत्वेनैव प्रमाणविषयत्वसंभवात् । चैतन्यस्य च सर्वदाभासमानत्वेनाज्ञानविषय
त्वात् । अन्यथा ज्ञानस्याप्यसिद्ध्यापत्तेः । ज्ञानानन्तु[illegible]प्रमाणानामप्रसिद्धत्वापत्तेः । स्वप्रतिपत्तेः ज्ञानादोष
संगोपि स्यात् अत्र हेतु ब्रह्मात्मनभवस्ति हत्व च भेदस्येति चेन्न भेदस्य सर्वदासिद्धत्वात् । न चाह । ब्रह्मजीवभेदः पारमार्थिको पार
द्वि मार्थिको वा नाद्यः जीवाद्भिन्नत्वे ब्रह्मणो घटादिवदनात्मत्वं जडत्वं च स्याज्जीवस्य चेतनत्वादिति । न द्वितीयः । विज्ञानमानंदं ब्रह्मेति
श्रुत्या व्याकोपो ब्रह्मणोऽज्ञानविषयत्वानुपपत्तेः जीवस्यापि ब्रह्माभिन्नत्वे असत्यत्वं स्यात् यथा वानेन जीवात्मनानुप्रविश्य
नामरूपे व्याकरवाणीति श्रुतिव्याकोपः अद्वितीये पीदं चिन्त्यं किं रज्जुसर्पवदनिर्वचनीयमुत शशविषाणवत्तुच्छं अाद्ये किंनत्कार

चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ४२

णमज्ञानमंतःकरणं वा नाद्यंत्यः अज्ञानस्य करणस्य सुषुप्तावदर्शनात् मनः संकल्पादिति श्रुतेः तदभावे तत्कृतभेद
स्याप्यभावात् द्वितीये चेत्तर्हि भेदस्योत्पादने अज्ञानस्य किंचित्स्वयात्र नमस्ति न वानांत्यः निःश्रेयाज्ञ नस्य कारणत्वानुपप
त्तेः यथाहुः नहि किंचन स्वाश्रयविषयत्वाभावान्नाद्यानांत्यः आश्रयविषयत्वाभावाद् ज्ञानप्रथात्र नातत[illegible] न आश्र
यलाभ इति तस्य जीवब्रह्मविभागात् पूर्वं केवलस्यात्मनि अज्ञानस्य सिद्धेर्भेदानपेक्षणादिना ज्ञानस्य स्वाश्रयाभिन्न
विषयत्वनियमात् तदुक्तं आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवलेति यथा वा न्यतमो दृष्टे तथा चेयं ननु तत्त्वमस्यादि
एकमेवाद्वितीयं ब्रह्मेत्यादिना भेदाभावप्रतिपादनत्वाच्च ननु वाक्यजन्यज्ञानेन जीवब्रह्मविभागनिराकरणो

श्री० ज्ञानेऽपि सर्वाभेदेन निराकृतः स्यादनात्मभेदस्य तावदवस्थितत्वादिति चेन्न तत्त्वमसि अयमात्मा ब्रह्मेत्यादिवाक्यैस्तत्त्वज्ञा-
१२ नेन प्रपञ्चस्यापवित्वा न जीवब्रह्मणोरैक्यं बोधयति किं तु नानास्तीति श्रुत्या नानात्मानं पूर्वं तिरस्कृत्य तयोरभेदं बोधयति
तस्मान्नात्मभेदोऽपि किंचिद्द्वितीयरूपापत्तिः अनात्मनोऽनात्मभेदस्य चाज्ञानकार्यत्वेन तुच्छत्वाद् गीतावाक्ये तदुक्तं तच्चानिर्व-
चनीयत्वाच्च वास्तवी चेत्यसौ त्रिधा त्रयाणामात्रिभिर्बोधैः ज्ञानयोनिः कल्पाकिकैरिति भेदयुक्तानक इति इदमुक्तं चैतन्यस्य
भासमानत्वेनाज्ञानाविषयत्वे वाऽविषयत्वे तन्न शुद्धानन्दचैतन्यस्य मिथ्याभेदेन परिकल्प्यानन्दस्वरूपमात्मानं
विषयत्वाभिधाने चैतन्यमात्रे अभासमानत्वादनावृतत्वं ज्ञानप्रतीत्यनवधानेऽपरिपूर्णानन्दस्वरूपोऽहमेवेति विदतं
भवप्राप्त्याच्च एतेन पूर्वोक्ताज्ञानाश्रितत्वापत्तिरागादेयप्रसंगादेव भावनाकृतोऽस्वप्रकाशश्चैतन्यस्यैव नाशकत्वादित्यर्थः

स्वज्ञानात्स्वगुणैर्नैव यद्वद्रज्जुर्हि सर्पिणी भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ४५

ननु जीवस्य ब्रह्मस्वरूपत्वे जीवत्वमपि तद्रूपं स्यादेव विशिष्टत्वं तु धर्मस्य विशेषणवृत्तित्वनियमात् यथा ब्राह्मणत्वविशि-
ष्टेऽपि ब्राह्मणशब्दस्य वाच्यता तथा जीवत्वविशिष्टे जीवशब्दस्य वाच्यतादिति चेन्न जीवस्य ब्रह्मैव स्वरूपं चित्स्वरूपत्वात् व्यतिरेके
घटवदित्यनुमानात् जीवे जीवत्वमुपाधिर्न तु विशेषणं अन्यथा पाचिकक्रियायाः पाचकविशेषणत्वे पाचकप्रसंगः विशिष्टव-
त्त्वे धर्मस्य विशेषणवृत्तित्वनियमात् तस्मादुक्तं सर्पभ्रमवत् जीवे जीवत्वं मिथ्यैव भातीत्यनेनोक्तं जीवत्वं चमत्कारोऽयमिति ४३
ननु चैतन्यस्यैकरूपत्वेऽप्याकाशादिविश्वभानमिति तत्राज्ञानवशादेव विश्वभानमित्याह स्वज्ञानादिति यथा स्वाज्ञाने-
श्री नावृता रज्जुः सर्पाकारैर्भाति तद्वदेव केवलाऽशुद्धा चितिरेव स्वाज्ञानवशादाकाशादिविश्वाकारेण भातीत्यर्थः तदुक्तं आप्तवाक्य
विभागिनी निर्विभागा चितिरेव केवलाऽपूर्वसिद्धत्वमसौ हि यस्मिन्नानास्य योगमवतिनापि गोचर इति ४५ रामायन १२

ननु विवर्ताधिष्ठानत्वेन ब्रह्मण एवाकाशादिप्रपंचोपादानत्वमिति दर्शयन्नाह उपादानमिति यथाध्यस्तस्य सर्पादेरुपादा १०
नमधिष्ठानान्नातिरिच्यते तस्मात्तस्मात्सर्वप्रपंचोपादानं ब्रह्मैवेत्यर्थः ननु ब्रह्मणो जगदुपादानत्वे उपादानोपादेययोर्व्या
प्यव्यापकताभेदोऽपि स्यात् शब्दाकाशयोरिव यथा शब्दकारणमाकाशो व्यापकत्वे शब्दे चाव्यापकत्वमिति चेन्न सर्वत्र घमेद
वेदमिति श्रुत्यात्मभिन्नस्य व्याप्यव्यापकभावस्य मिथ्यात्ववचनात् तद्दर्शयति व्याप्यव्यापकतेति ननु व्याप्यव्याप
कतायाः मिथ्यात्वे व्यापकभावस्यापि मिथ्यात्वं स्यात् व्याप्याभावव्यापकत्वासिद्धेरिति चेन्न व्यापकत्वापरिज्ञानात् सर्वात्मक
सर्वसंबन्धकत्वं ह्याकाशादीनां परस्परव्यभिचारिणां सत्तापूरकत्वमिति यावत् न तद्व्यन्येनान्यत्सर्वात्मना व्याप्यत्वे व्या
प्यस्वरूपासत्त्वप्रसंगात् व्यापकस्वरूपविनिर्मुक्तव्याप्यस्वरूपाभावात् व्यापकस्य स्वरूपेसद्रूपात् तयाविनिर्मुक्तस्य घ

उपादाने प्रपंचस्य ब्रह्मणो यन्न विद्यते तस्मात्सर्वप्रपंचोऽयं ब्रह्मैवास्ति न चेतरः ४५ व्याप्यव्यापकता मिथ्या सर्वमा
त्मेति शासनात् इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ४६ श्रुत्यानिवारितं नूनं नानात्वं स्वमुखेन हि कथं भासो भवेदन्यः

टादेः स्वस्वरूपाभावात् अन्यथा सर्वात्मनाव्याप्त्यसंभवात् सत्ताद्वयस्यैकत्रायोगाच्च तस्माद्व्यापकस्य तत्त्वे स्वरूपे परे सर्वोपाधिर
हिते स्वरूपे ज्ञाते साक्षात्कृते सति व्याप्यव्यापकभेदव्याप्यमिति भेदस्यावसरः कुतः न क्वापीत्यर्थः ४६ ब्रह्मरूपस्य द्वैतस्य निषेधपि श्रुत्या
त तद्दर्शयति श्रुत्यानिवारितमिति नेह नानास्तीति श्रुत्या स्वमुखेनैव नानात्वनिवारिते एकमेवाद्वितीयं ब्रह्मेति
श्रुत्येनाद्वयस्वात्मनः सर्वाधिष्ठानत्वेन सर्वस्य कारणे स्थिते सति प्रपंचस्य सत्ता कथं व्यापकसत्तायाभिन्ना भवेत्
अधिष्ठानसत्तातिरिक्ताया आरोपितस्य सत्ताया अभावादित्याह कथं भासो भवेदन्य इति यथा भासकादित्या
भासस्य सत्तानान्यात् तदात्मचैतन्यसत्ताया भासस्य प्रपंचस्य सत्तापि न भिन्नेत्यर्थः ४७ समाधानम् :

अथ भेददर्शिने यद्दूषणं तदाह दोषोपीहेति स्वस्वरूपत्वेनात्मात्मज्ञाने प्रपंचज्ञाने यो दोषो भ्रान्तिः सा श्रुतिस्मृतिन्यायप्रसिद्धा च
अ० श्रुतिस्तावत् इहचेदेदीअथसत्यमस्ति नचेदेदीन्महतीविनष्टिरिति श्रुतेः स्मृतिस्तु अज्ञानेनावृतं ज्ञानं तेन मु
१३ ह्यंति जंतवः युक्तिरपि सर्वाणि कुशागमानि नष्टादयानानि ज्ञानाभावमनुष्ठाः परवर्त्तयन्त्यज्ञानतः न त्वपजंति केचिदिति ज्ञात्वा

या
दोषोपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति इह पश्यति नानात्वं मायवंचितो नरः ४८ ब्रह्मणः सर्वभूतानि जायंते परमात्मनः तस्मादेतानि ब्रह्मैव भवंतीत्यवधारयेत् ४९ ब्रह्मैव सर्वनामानि रूपाणि विविधानि च कर्माण्यपि समग्राणि बिभर्त्तीति श्रुतिर्जगौ ५० सुवर्णाज्जायमानस्य सुवर्णत्वं च शास्वतम ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ५१
वः

प्र
ज्ञाने फलं पश्य यथाविधिं ४८ पूर्वं निषेधमुखेन प्रपंचाभावमुक्त्वा इदानीं विधिमुखेनैव पंचाभावं दर्शयति ब्र
ह्मण इत्यादिश्लोकत्रयेण यथा सुवर्णाद्विवर्त्तो कुंडलादिः सुवर्णान्न वस्तुतो भिन्नः किंचिदपि न भवति तद्वदात्म
नो विवर्त्तो नामरूपादिप्रपंचो ह्यात्मभिन्नः कालत्रयेपि नास्त्येव इत्यर्थः ४९ ५० ५१ ओम रामराम
च२

जीवपरमात्मनोर्भेदस्तावन्न्यरूपि इत्यत आह स्वस्मर्पणं तस्मिन्निति जीवात्मपरमात्मनोर्भेदः स्वल्पोपि वक्तुं दोषावहः तत्राह
त्वविषमिवनश्चाच श्रुतिः योसावन्योहमस्मीति पश्युर्वेद एवानामिति न चाजैः आत्मानमद्वयं कश्चिज्ज्ञानात्तिजगद्
गुरुं तद्विन्नस्तस्मात्कुर्वन्न न भवेत्तस्य कुत्रचित् स्वविरुद्धस्यापि तस्य मर्पणं भवतीति न च पूर्णानां स्वपि उद्धरेदात्मनात्मानं ना
त्मानमवसादयेत्. इत्यादि किंचिदन्यदपि जीवपरमात्मभेदो न संभवत्येव न ह्याहि सोपि प्रमाणसिद्धो भगवत्सिद्धो वानंतस्यः
विषयबाधे हि भ्रमत्वात् ज्ञानस्य प्रत्यक्षभेदग्राहकं प्रमाणं लौकिकं वैदिकं वा आद्ये किं तत्प्रत्यक्षमनुमानमन्यद्वा नाद्यः प्रत्यक्ष
सिद्धत्वे वादिनां विवादाभावप्रसंगात् प्रत्यक्षस्य जीवब्रह्मणोः अग्राहकत्वाच्च न द्वितीयः आत्मनो निर्धर्मकत्वेन तत्व्याप्तिग्रहे
नारनिश्चयेनानुमानाविषयत्वात् अनुमानेनैव तन्निश्चयश्चेत् आत्माश्रयादिदोषसंभवात् न तृतीयः प्रत्यक्षा

स्वस्मर्पणं कृत्वा जीवात्मपरमात्मनोः यः संतिष्ठति मूढात्मा भयं तस्याभिभाषितम् ५२

द्यविषयत्वे अन्यविषयत्वस्य संभावयितुमशक्यत्वान्नहि तृतीयो वेद प्रमाणसिद्धत्वे भेदस्य नेति नेतीति निषेधः न घटकः स्यात्
धर्मवत्त्वप्रतिपादकागमस्य अत्र पूर्वकोटुस्यमानत्वं परयावा द्वितीय ब्रह्मणोवतारस्यैवावधारणा न ननु नाहं ब्र
ह्मेति प्रत्यक्षमपि जीवपरमात्मभेदग्राहकं किं न स्यात् नत्राह भेदग्राहि प्रमाणस्य भिन्ने भेदग्राहिकत्वमभिन्ने वा
द्यः भेदग्राहकस्यैव प्रमाणत्वस्यापादनेस्मिन्न तद्विषयत्वात् भेदाधिकरणभेदको भेदोपमेवभेदोनरं वा यद्यभेवन्नाद्यं
त्माश्रयस्याभिन्नस्य स्वरूपेणैव भेदोनरं वा हि न ह्याहकज्ञानस्य भिन्ने भेदग्राहकत्वमनाभिन्ने नान्त्यः भेदग्राहकस्यैव प्रमाणस्य
त्वस्यापादनेस्मिन्न तद्विषयत्वात् भेदाधिकरणभेदको भेदोपमेवभेदोनरं वा आद्ये आत्माश्रयः स्वाभिन्नस्य स्वरूपेणैव भेदोद्वा
पि भिकल्पनेप्यात्माश्रयः तेन विना तस्यासिद्धेरेव चक्रकाद्यवस्थादिदोषस्यापि संभवेद्द्वानवस्थः तस्माद्द्विधैत्यप्रमाणसिद्धो हि न त्र

अ०
२४

अथ प्रत्यगात्मनोरैक्यज्ञानेन शोकाद्यभावमाह यथा ज्ञानोद्भवेत्यादित्रिभिः ज्ञानोद्भवेन द्विरोध्यज्ञानस्य बाधात् तथा नरतिकृतात्मा आत्मवित् ब्रह्मविद्ध्येव भवति अयमात्मा ब्रह्मैवेत्यादिबृहदारण्यकयाश्रुत्या निर्धारितं सर्वात्मकत्वं स्मृत्यापि तद्दर्शयति वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इत्यादिः अन्यत्स्पष्टार्थमिति ५३ ५४ ५५ अथ चाकाशादिप्रपंचज्ञानेस्वप्नभ्रमाद्विशेषप्रदर्शनार्थं द्वयोरपि प्रपंचयोः साम्यतामाह अनुभूतेर्विषयमिति यथा स्वप्नभ्रमविषयोगतत्तदुरगादिप्रपंचोऽसद्रूपस्तथा जाग्रद्भ्रमविष[यो]ऽप्याकाशादिप्रपंचोऽसदेव अविद्याजनितत्वाविशेषात् ननु तयोर्ज्ञानयोरपि वैषम्यमाविद्यकत्वाविशेषात् ननु स्वप्नभ्रमाज्ञानस्य नेवाधेऽस्ति कश्चिद्विशेषः प्रत्यक्षादिप्रमाणाविद्याकारणकत्वभावाभावाभ्यां नहि याहशमर्थमिंद्रियादिजन्यज्ञानविषयीकरोति तादृशमेवाविद्याजन्यभ्रमोऽपीति संभवति भ्रमात्पूर्वं विष

यथा ज्ञानोद्भवे द्वैतमितरं नानुपश्यति आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ५३ तस्मिन्सर्वाणि भूता
निस्यात्मत्वेन विजानतः नैव तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ५४ अहमात्मा हि ब्रह्मैव सर्वात्मकतया
स्थितः इति निर्धारिते श्रुत्या बृहदारण्यकसंस्थया ५५

यस्यासत्त्वात् इंद्रियादिजन्यज्ञानस्य चेंद्रियार्थसन्निकर्षादिजन्यत्वेन ज्ञानात्पूर्वं विषयसत्त्वस्यावश्यंभावात् अन्वयव्यतिरेकप्रमाणाभ्यां चेंद्रियादेः कारणत्वस्य सिद्धत्वादित्याकाशादिप्रपंचज्ञाने प्रपंचज्ञाने च विशेषः कारणकृतोऽतः तस्मात्कथमनयोर्ज्ञानयोः साम्यं ज्ञानबाधे नैव स्वप्नभ्रमविषयप्रपंचवाधादेव वैषम्येन च विषयसाम्यतापि कुत इति चेन्नैवमिंद्रियाणां कारणत्वमेव सिद्धं तद्वत्स्वप्नभ्रमेऽपि तेषामन्वयव्यतिरेकधीः इंद्रियादेर्वस्तुतः प्रपंचज्ञानं प्रत्यकारणत्वात् कुत इति चेत् त्त्र वक्तव्यं किमिंद्रियादेः प्रमितिमात्रकारणता किं वा भ्रमप्रमासाधारणज्ञानमा

त्वेन प्रमात्वस्यान्योन्याश्रयत्वेन दुर्निरूपत्वात्। तथाहि ज्ञानस्य प्रामाण्यं भ्रमविषयत्वावृत्तार्थविषयत्वेन साधनीयं भ्र-
मस्य भ्रमविषयत्वावृत्तित्वं च प्रमाज्ञानविषयत्वेनेत्यन्योन्याश्रयापत्तेः। किं च भ्रमस्य भ्रमत्वावृत्तित्वे प्रमितिविषय-
त्वेन प्रयोजकं मिथ्या रजतमिति प्रमित्यासत्यस्यापि रजतस्य विषयीकरणात् बाधितत्वस्य चासिद्धेः तन्निधितत्वाबाधितार्थं
त्वे प्रमाणमिति प्रमाणलक्षणं तस्मादिन्द्रियाणां प्रमाणत्वेनाबाधितार्थविषयत्वं वक्तव्यं तेनाधिष्ठानमात्रविषयत्व प्राप्तं तस्यैव
ज्ञानत्वात् प्रपञ्चस्य सर्वस्यावृत्तेकरूपस्य पुनर्ज्ञानत्वकल्पने प्रयोजनाभावात् तथा ज्ञातो घट इति प्रत्यक्षविरोध इति वाच्यम् भ्र-
ज्ञानेन सह साक्षिचैतन्ये घटादेरध्यासात् रजतं सुखमितिवत्तत्प्रत्यक्षस्याभासत्वाच्च अधिष्ठानत्वं च प्रमातरि एव विश्रान्तं त-
त्प्रत्यगात्मविषयाणीन्द्रियाणि प्रमाणानि वक्तुं शक्यानि तच्च तेनापरोक्षत्वे प्रत्यगात्मनो निर्धर्मत्वेनेन्द्रियाविषयत्वात् तथा चाप्र-
तिः तत्सहचरितं शुक्तिरूपमस्य न च लक्षणाप्रसक्तिः किं च इति तेन भ्रमप्रमासाधारणज्ञानकारणत्वमप्रमाणस्य प्रमाक-

अनुभवोऽप्ययं लोकव्यवहारहेतुर्नापि सन्न असद्रूपो यथा स्वप्नजातं तद्वदेव बाध्यते ५६

णत्वस्य निरूपयितुमशक्यत्वात् भ्रममात्रे चेत् भ्रमज्ञानस्याविद्यायोनित्वं तद्वदेवोक्तत्वात् प्रत्यक्षादिप्रमाणाविद्याकारणत्वभा-
वाभावाभ्यामित्यनेन तस्मात् घटपटादिकार्थप्रत्यविद्यैव कारणम् इति स्थितं इन्द्रियान्वयव्यतिरेकयोश्च सत्त्वे इन्द्रियान्वयव्य-
तिरेकवत् ज्ञानत्वमित्यपि शङ्कार्थः अज्ञानेवाज्ञं व्यवहारहेतुर्नापि सन्निति तथा च तयोः प्रपञ्चयोः साम्यमेव न नवैलक्षण्यमि-
त्यर्थः घटादिकार्यप्रत्युपादानत्वेन महदादिग्रहणं तस्य प्रवदविद्यकेवेत्याह असद्रूप इति उपमर्दकस्य कालत्रयेऽपि प्रप-
ञ्चो नास्तीति प्रत्ययस्य प्रमितिरूपस्य बाधापरपर्यायस्याविद्यात्मत्वं ज्ञायमानत्वात् स्वप्नजं तद्वदेव बाध्यत इति ५६॥
व

अ॰ १५ पुनरपि प्रपंचस्याभावरूपताप्रदर्शनार्थमिदानीं जागरणावस्थात्रयाणां परस्पराभावाधिकरणत्वं दर्शयति स्वप्नो जाग-
रणेऽलीक इति जागरणे जागरावस्थायां स्वप्नसुषुप्त्योरभावः इंद्रियवृत्तिकालीनत्वात् स्वप्नेऽपि सुषुप्तिजागरयोरत्यन्तविपरी-
तमोऽहंकत्वात् लये सुषुप्तौ स्वप्नजागरयोरुभयोरप्यभावः सर्वोपरमत्वात् तस्मात्त्रयाणामेव परस्पराभावाधिकरणत्वेन व- घा
स्तुतस्त्रयाणां मिथ्यात्वात् त्रयाणां स्वप्नत्वाद्युपाधिनात्मत्वेन त्रित्वोपपत्तिः तथाहि इंद्रियवृत्तिकालीनत्वेन जागरणत्वं
तदभावे तेनांतःकरणमात्रेण स्वप्नत्वं पुनस्तस्यांतःकरणस्य स्वकारणे लयाकारतानात्मनावस्थाने सति सुषुप्तित्वमित्युपा-
धेनात्मत्वं वस्तुतस्त्रयाणामेव स्वभावप्रतियोगित्वे कथं परस्पराभावाधिकरणत्वमिति न हि घटाभावप्रतियोगिनो घट-

स्वप्नो जागरणेऽलीकः स्वप्नेऽपि जागरणं न हि । द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥ त्रयमेवं भवेन्मिथ्या
गुणत्रयविनिर्मितम् । अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥ ५८ ॥

स्यतत्काले कस्यचिदधिकरणत्वासंभवति इत्यविरोधादिति चेन्न दंडाभाववद् ज्ञानाद्ये सर्पः किंतु दंडमिति प्रतीत्या रज्जु-
निष्ठदंडाभावप्रतियोगिनोऽपि दंडस्य सर्पाभावाधिकरणत्वदर्शनात् ५७ तस्मात्त्रयाणां मिथ्यात्वमाविद्यकगुणत्रय-
विनिर्मितत्वादित्याह त्रयमेवं भवेदिति सत्त्वगुणकार्यं जागरणं प्रकाशकत्वात् रजोगुणकार्यं स्वप्नः क्रियात्मक-
त्वात् विपरीततमोऽहंकत्वाच्च तमोगुणकार्यं सुषुप्तिरप्रकाशात्मकत्वात् सर्वोपरमत्वाच्च वस्तुतस्त्रयाणां मिथ्यात्वे शू-
न्यमेवावशिष्यत इति चेन्न सर्वबाधावधिभूतचैतन्यस्य द्रष्टृत्वादित्याह अस्यावस्थात्रयस्य तदभावस्य वा यो द्रष्टा
साक्षी गुणातीतो नित्यमेव स्वतो न स्फुरति हि शब्देन जीवत्वाभावबोधकः साक्षी चेता केवलो निर्गुणश्चेति श्रुतिः ५८

घटत्वं यथा घटे घटत्वं स्वाभाविकं तथा जीवे जीवत्वमपि स्वाभाविकमेव न तथा च कथं तदभावे जीवत्वस्वरूपसिद्धिः स्यादिति चेन्न
महावाक्यजन्यज्ञानेन साधारणप्रपंचबाधे सति जीवस्य वस्तुमात्रत्वसिद्धिः स्यादेवं सिद्धान्ते ब्रह्मस्वरूपाज्ञानात् जीवत्वस्यौ
पाधिकत्वेन तदसत्त्वाच्च स्वाज्ञानकल्पितमिति यद्वन्मृदि घटभ्रांतिरित्यादि यथा मृत्तिकायां घटनामभ्रांतिः शुक्त्याकारे रजतख्या
तिः कनके कुंडलभ्रांतिराकाशे च नीलत्वं मरुस्थले जलभ्रांतिः स्थाणौ वा पुरुषस्य भ्रांतिः तथा ज्ञानवशात् सर्वं पूर्णविज्ञानघन

तिः यद्वन्मृदि घटभ्रांतिं शुक्त्याकारे रजतस्थितिः तद्वद् ब्रह्मणि जीवत्वं वीक्ष्यमाणे विनश्यति ५९ यथा मृदि घटो नाम कन
के कुंडलाभिधा शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ६० यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले पुरुषत्वं
यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ६१ यथैव शून्ये वेतालो गंधर्वाणां पुरं यथा यथाकाशे द्विचंद्रत्वं तद्वत्सत्ये जग
त्स्थितिः ६२ यथा तरंगकल्लोलैर्जलमेव स्फुरत्यलं पात्ररूपेण ताम्रं हि ब्रह्मांडौघैस्तथात्मनः ६३ घट
नाम्ना यथा पृथ्वी पटनाम्ना हि तंतवः जगन्नाम्ना चिदाभाति मदेव हि घटादिकम ६४

ब्रह्माभिन्नत्वेऽप्यज्ञानात्मनि जीवे जीवत्वभ्रांतिः जगत्भ्रांतिश्च तदभावेन तद्रूप विचारबाधेन हि ज्ञानस्याभ्रमत्वात् वि
वर्त्तानामधिष्ठानत्वेन सत्यत्वाच्च तस्मात् सर्वप्रपंचाय ब्रह्मविवर्त्तत्वात् ब्रह्मणो नाभिन्नमित्यर्थः एतदेवाह जगन्ना
म्ना चिदाभातीति जीवत्वं च यथा भ्रमविभ्रमकाले नास्ति ब्रह्मैव तत्स्वरूपं तदा कस्य नाले वीक्ष्यमाणे वर्तमाने
काले ऽपि नास्तीत्याह वीक्ष्यमाणे न नश्यतीति अधिष्ठानसाक्षात्कारे जाते प्रपंचभानाभाव इत्यर्थः ५९।६०।६१।६२।६३।६४

स० यथाज्ञानकस्यचिन्नस्य सर्वप्रमाणादिव्यवहारस्याधिष्ठानव्यतिरेकेणाभावप्रदर्शनार्थमाह सर्वोपीति यथा कस्यचिन्नरस्या
१६ दिव्यवहारे रज्ज्वनाद्यवच्छिद्यते यथा वा घटादिव्यवहारो मृदादिनाच्छिद्यते तथा प्रमाणादि सर्वव्यवहारोपि ब्रह्मणा
णव कुर्वन्ति मूढाः ब्रह्मभेदेन प्रपंचस्य शून्यत्वादित्यर्थः परत्वज्ञानवशादेव प्रमात्रादिभानमित्याह अज्ञानान्नवि
ज्ञानं तिष्ठति यथा चन्द्रादिप्रमाणैर्न्निरूप्यमाणघटो मृत्तभिन्नो नोपलभ्यते तथा महावाक्यप्रमाणेन निरूप्यमाणो
पि प्रपंचो ब्रह्मणोऽधिष्ठानात् भिन्नो किंचिदपि नास्तीति ६५ दृष्टिवाह कार्यकारणतेति यथा मृद्विवर्त्तो घटो मृद्भिन्नो
तथा

सर्वोपिव्यवहारस्तु ब्रह्मणाक्रियते ऽज्ञानान्नविज्ञानंतिमृदेव हि घटादिकं ६५ कार्यकारणतानित्यमा
स्ते घटमृदोर्यथा तथैव श्रुतियुक्तिभ्यां प्रपंचब्रह्मणोरिह ६६ गृह्यमाणे घटे यद्वन्मृत्तिकाभाति वै बला
त् वीक्ष्यमाणे प्रपंचेपि ब्रह्मैव भाति भास्वरम् ६७

त्तास्ति विवर्त्तत्वात् तथा सर्वं खल्विदं ब्रह्मेत्यादिश्रुत्या प्रपंचे विचार्यमाणे ब्रह्म विवर्त्तत्वात् ब्रह्मैव भाति भास्व
रं स्वप्रकाशमत उक्तं प्रपंचब्रह्मणोरिहेति प्रपंचो ब्रह्मविवर्त्तत्वात् ब्रह्मैवोपितं मृत्तायाः अधिष्ठानसत्तातिरिक्ततयानंगीकारात्
न दृश्यमानतावशिष्टेन चिद्रूपं च भूतानि चिद्रूपमुपनत्रय विज्ञानमयं नास्त्येतमेव चिदेवहीति ६८ ननु प्रपंचब्रह्म
णोरैक्यं येन न ब्रह्मप्रपंचयोरभेदो निश्चीयते किं त्वाकाशादिषु ब्रह्मबुद्धिर्विधीयते यथा प्रतिमादौ विष्ण्वादिबुद्धिः नेत्याशंक्य
बुद्धिर्विधीयते इति वेत्तत्र ब्रह्मबुद्ध्युपमर्द्दतत्वात् नैषा रज्जुबुद्ध्युपमर्द्दित सर्पादीनामिव तथा हि जीनाम ब्रह्मरूपं ब्रह्मैवेति
ज्ञानादिनात उपवाह गृह्यमाणे घटे इति वदेन गृह्यमाणो घटो यथा मृद्भिन्नो न भवति मृत्तिकैव भाति तथा वाक्यप्रमाणे वीक्ष्यमाणोपि

सर्वदा भानस्वरूपे सवितरि यथान्धकारस्य तमसावृतोऽयं सवितेति मन्यते तथा नित्यशुद्धबुद्धमुक्तस्वभावस्य सदानंदरूप-
स्यापि आत्मनोऽज्ञानवशात् दुःखित्वाद्यभिमानो भवतीत्याह । स एवात्मेति यद्यप्यात्मा वस्तुतोऽज्ञानकालेऽपि शुद्ध एव
असंगो ह्ययं पुरुष इति श्रुतिः तथापि ज्ञाता ज्ञानज्ञेयैर्विशिष्टः स दृश्यते दर्शयति यथैव ह्यविवेकिनः यथा मंदांधकारे वा नि-
शि स्वाज्ञानेनावृताया रज्जोरेव सर्पाकारेण भानं प्रकाशकाले च सा एव रज्ज्वाकारेण भाति तद्वदात्माप्यज्ञानिकाले बद्धमि-
व ज्ञानविरोधि ज्ञानकाले तु मुक्तमिव प्रतीयते वस्तुतोऽनवद्धमुक्त एवास्त्यात्मेत्यर्थः । १८ पुनरपि पूर्वोक्तस्य देहात्मभेदस्य मिथ्यात्वमे-
व स्पष्टयति कुंभायत इति यथा मृद्धिकारो कुंभो मृदेव न तथा ब्रह्मविकारो प्रपंचोऽपि ब्रह्मैवेत्यर्थः ननु देहस्य चिन्मयत्वांगीकारे वा-
रवाकान्तानापत्तिः इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इत्यादि श्रुतिविरोधप्रसंगात् स्यात् देहात्मभेदस्य समस्तायशरीरमित्यनु

स देवात्मा विष्णुर्हरिरिति तथा ब्रह्मभानि वै सदा यथैव ह्यविवेकिनां ज्ञानिनां ज्ञानिनोऽनिशं १८ कुंभायते-
व मृन्मयस्तद्वद्देहोऽपि चिन्मयः आत्मानात्मविभागोऽयं मुधैव क्रियते बुधैः १९

नवसिद्धत्वाच्च यथा घटादिद्रष्टा घटादिभ्यो भिन्न इति युक्तिसिद्धत्वाच्च इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः
क्षेत्रज्ञमिति तद्विदः क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परं इत्यादिस्मृतिसिद्धत्वाद्देहात्मभेदस्य
निवृत्त्यात्मैव स्वाज्ञानवशात् देहाकारेण प्रतीयमानत्वात् अनात्मा आत्मभिन्नो कालत्रयेऽपि नास्तीति तस्य श्रुतिप्रत्यक्षोपा-
योनिषेधप्रतिपादित्वप्रदर्शनार्थमाह देहोऽपि चिन्मय इति अनेनान्वारगात्वमपि देहात्मविभागस्य द्वैते आत्मानात्मनोर्विवेक-
कनयोक्तप्रकारेण मिथ्यात्वांगीकारात् न दोषः आत्मानात्मेति विभागो मुधैव नामेति यथैव बुधैरात्मानात्मविभागः क्रियते इत्यर्थः
इंद्रियेभ्यः परा ह्यर्था इत्यादि श्रुतिः स्मृतिस्तु देहात्मवादनिषेधनपरा न तु भेदपरा इत्यर्थः अन्यथानुभवादिबलेन भेदांगीकारे
एकमेवाद्वितीयं नेह नानास्ति किंचिन इत्यादि वाक्यानां स्वार्थे प्रामाण्येन स्यात् १९

तस्मादज्ञानवशात्आत्मनि देहत्वमध्यस्तमेव भवति रज्ज्वादिषु सर्पादिप्रतीतिवदित्यत एवाह सर्पत्वेनेति पुनरपि देहात्माभिमान
अ० स्यानिवृत्त्यर्थं प्रदर्शनार्थमिति ज्ञात्वा मनुष्यापयति ननु यद्यात्मनो नित्यशुद्धस्वभावत्वं श्रुतिस्मृतिसिद्धं तर्हि स्थूलोऽहं कृशोऽह
९ मिति देहत्वेनात्माभिमानो न स्यात् तदभावे च देहेन्द्रियादीनां प्रवृत्तिर्न स्यादिति चेन्न विवर्त्तानामधिष्ठानाद्भेदेनासत्यत्वादिति
सर्पत्वेनेत्यादिश्लोकपंचकेनाह स्वविमूढेनेति ब्रह्मविदाद्यन्येव निर्णीतं आत्मनः सर्वदा व्यभिचारित्वेन नित्यत्वं स्थूना

सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका विनिर्णीता विमूढेन देहत्वेन तथात्मनः ॥१०॥ घटत्वेन यथा पृथ्वी पटत्वे
नैव तन्तवः विनिर्णीता विमूढेन देहत्वेन तथात्मनः ॥११॥ कनकं कुण्डलत्वेन तरंगत्वेन वै जलं विनिर्णीता
विमूढेन देहत्वेन तथात्मनः ॥१२॥ पुरुषत्वेन वै स्थाणुर्जलत्वेन मरीचिका विनिर्णीता विमूढेन दे
हत्वेन तथात्मनः ॥१३॥ गृहत्वेन काष्ठानि खड्गत्वेनैव लोहिका विनिर्णीता विमूढेन देहत्वेन तथात्मनः ॥१४॥
व

त्मनो नित्यत्वं जडत्वाद्देहनाशत्वाच्च तद्व्यतिरेकमपि नीतास्य नासतो विद्यते भावो नाभावो विद्यते सतः उभयोरपि दृष्टोऽन्तस्त्व
नयोस्तत्त्वदर्शिभिः ॥१॥ ननु सत्यस्य एव सर्पादेः सत्त्वेऽपि तद्व्यभिचरतीति कथं सर्वं सत्स्वरूपे आत्मन्यसत्त्वरूपस्य दे
देहादेरध्यास इति चेन्न यद्यपि तत्त्वमस्यादिवाक्यजन्यज्ञानोत्तरकालेऽतुच्छत्वमेव देहादिप्रपंचस्य तथापि यौक्तिकविचारेण दे
देहादीनामनिर्वचनीयत्वांगीकारेण कस्मिंश्चिदज्ञानवशात् वर्त्तमानकाले सद्भासमानत्वेऽपि रज्जुसर्पादेः सद्वेतिवत्सत्त्वेनत्वात् ११
मा।

वक्ष्यमाणान्निश्लोकान्निदर्शयति यथा वृक्षेत्यादिना यथा कस्यचित्पुरुषस्य मनसि वृक्षविपर्ययो ऊर्ध्वमूलत्वं जलोपाधेर्निमित्तादेव भाति यथा च दोषवशात् शुभ्रेऽपि पीतत्वं यथाऽलातेऽल्पकाष्ठे च तस्य भ्रमणेन सूर्यमिव वर्तुलं महत्त्वं भाति यथा चोपनेत्रतः स्थूलत्वमप्यसत्येव भाति तद्वदात्मनि शुद्धस्वरूपेऽप्यज्ञानसंबंधात् देहत्वं दृश्यत्वं च भाति तद्वदात्मनि शुद्धेऽप्यध्यास एव ७५ ७६ ७७ ७८
७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ अज्ञानवशादात्मनात्मनो गन्धान्याध्यासः संभवेननेन देहाद्यध्यासो बुद्ध्याभिन्ने आत्मनि समुत्पाद्य

यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७५ पोतेन गच्छतः पुंसः सर्वं भातीव चंचलं तद्वदात्मनि
देहत्वं पश्यत्यज्ञानयोगतः ७६ चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकं तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७७ पीतत्वं हि यथा शुभ्रे
दोषाद्भवति कस्यचित् तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ७८ अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् तद्वदात्मनि देहत्वं पश्यत्यज्ञा-
नयोगतः ७९ महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८० सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपने-
त्रतः तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८१ काचभूमौ जलत्वं वा जलभूमौ हि काचता तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८२
यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८३ यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् तद्व-
दात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८४ अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै तदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८५ यथा शशी
जले भाति चंचलत्वेन कस्यचित् तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ८६ एवमात्मन्यविद्यातो देहाध्यासो हि जायते स एवात्म-

पुनर्महावाक्यजन्यज्ञानेनाज्ञाननाशे सति देहादिप्रपंचस्यापि लयं प्राप्नोत्येव दर्शयति एवमात्मनीति एवं पूर्वोक्तप्रकारेणाज्ञानोपाधिकोऽध्यासो नित्यस्थूलोऽहं कृशोऽहमिति देहधर्माणामध्यासः समुत्पाद्य पुनस्तत्त्वमस्यादिवाक्यजन्यात्मपरिज्ञानात् लयमप्यात्मन्येव संभवति यथा भ्रमजन्यज्ञानात् तस्मिन्नेव रजतप्रतीतिस्तस्याश्च चक्षुरादिप्रमाणजन्यशुक्तिरिदमिति ज्ञानेन तदज्ञाननाशे सति तत्प्रती-
तिरपि तस्मिन्नेव लीयते नान्यत्र तत्तद्वदित्यर्थः ८७ ॥

ना

पुनरप्यात्मज्ञानं स्तौति सर्वमात्मतयेति सर्वं स्थावरं जंगमं जगदात्मैवाहमिति विधिमुखोपदेशजन्यसर्वात्माकाररूपे सम्य
श्लो० १८ क्दर्शने ज्ञाने ज्ञाते देहभावो वा आत्मभावो वा इति विकल्पावसरो कुतः सर्वभावानामभावात्संभवतीत्यर्थः १८ पूर्वोक्तमर्थं
दृढीकर्तुं जगद्बाधेन स्वप्नभ्रमादर्शनवत् नन्वेवमस्त्वादिवाक्यजन्यात्माभेदज्ञानेन ज्ञानतत्कार्यं स्यादिति प्रपञ्चस्यादर्शनात्
बृप्रारब्धकर्मसंचितक्रियमाणकर्मणामज्ञानकार्यत्वाद्ज्ञानाऽभावेन तद्घातेऽपि प्रारब्धकर्मणां बलिष्ठत्वात्तासामुपभोग्यत्वमिति आत्मानं

का

सर्वमात्मतया ज्ञाते जगत्स्थावरजंगमम् अभावात्सर्वभावानां देहता चात्मनः कुतः १८ आत्मानं सत
तं ज्ञात्वा कालं नय महामते प्रारब्धमखिलं भुञ्जन्नोद्वेगं कर्तुमर्हसि १९

म

सततमिति आत्मानं स्वस्वरूपं प्रत्यक्प्रकाशत्वेन स्वयंप्रकाशस्वभावलक्षणमहं स्मीति निरन्तरं सततं ज्ञात्वानुध्यायि लोकसं
ग्रहार्थं बाधितानुवृत्त्या मरीचिजलवन्मिथ्याशरीरादिनिर्वाहार्थं लोकदृष्ट्या ज्ञानेनान्यत्तत्र नरं शेषकालं ते पार्थ किंचिदि
च्छन्निच्छन् परेच्छया प्रारब्धकर्मणां तत्फलानामपि सुखदुःखलक्षणानां भुञ्जन् सन् तत्र हर्षविषादं कर्तुं न
योग्योसीत्याह नोद्वेगं कर्तुमर्हसीति तथा गीतासु नद्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते इत्यादिः १९ राम

किं तूत्पन्नेऽपीति उत्पन्नेऽप्यात्मज्ञाने सर्वात्मविज्ञाने उत्पन्ने ज्ञाने सति संचितक्रियमाणकर्मनिवृत्तावपि प्रारब्धं न निवर्तते आरब्धफलत्वात् ज्ञा
नाविरोधित्वाच्च तथा च श्रुतिः तस्य तावदेव चिरं यावन्न विमोक्ष्ये इति सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही
नैव कुर्वन्न कारयन् इत्यादिस्मृतिश्रवणात् पूर्वपक्षमेवानुवदत्युत्पन्न इत्याह प्रारब्धं नैव मुंचतीति नेदं वक्तव्यमिति तत्करणं प्रतिजानीते तन्निरा
क्रियतेऽधुनेति ९० पूर्वप्रतिज्ञातं हेतुमाह तत्त्वज्ञानोदयादिति ज्ञानोत्तरकाले देहादीनामसत्त्वमेव तत्त्वज्ञानेनाज्ञाननाशेन तन्नाश
सद्भावात् ज्ञानस्य देहाद्येतत्स्वरूपप्रपंचस्यासत्त्ववत् प्रारब्धस्याप्यज्ञानकार्यत्वात् ज्ञाननाशेनैव तन्नाशमुचितमेवेत्याह देहादीनामिति
तत्त्वज्ञानेनाज्ञाननाशेऽपि प्रारब्धनाशो न संभवति नाशकाभावात् तथा हि तन्नाशकं किं ज्ञानं आत्मा वा आद्ये किं ज्ञानमात्रं उ

उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुंचति इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना ९० तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं ने
व विद्यते देहादीनामसत्त्वात्तु यथा स्वप्नविबोधितः ९१

त्मज्ञानं वा नाद्यः ज्ञानमात्रस्य ब्रह्मणो ज्ञानत्वेन निराश्रयस्यानुपपन्नत्वात् द्वितीयेऽप्यात्मज्ञानस्याज्ञाननाशकत्वेनान्यथासिद्धत्वात् नापि
द्वितीयः आत्मस्वरूपस्य सर्वदा विद्यमानत्वेन विरोधित्वाभावात् न च प्रारब्धस्याप्यविद्याकार्यत्वेनाविद्यानिवृत्त्या तस्यानुपपन्न
त्वात् यथा तंतुनाशे पटनाशस्तस्मात्कारणनिवृत्त्या कार्यनिवृत्तिरवश्यं वाच्यं नैयायिकानामुपादाननाशेऽपि क्षणं कार्यमवस्था
नवत् निवृत्तिशंकाश्रुतिरूपत्वात् न चोत्तरक्षणे निवृत्तिः स्यादिति वाच्यं तत्क्षणवत्तदुत्तरक्षणस्यापि क्षणत्वाविशेषात् सिद्धान्तेऽपि
कारणनाशे कार्यस्थितिर्दृश्यते यथा रज्ज्वां सर्पभ्रमाभावेऽपि तज्जन्यभयकंपादिकं किंचित्कालं त्वनुवर्तते एव यथा वा मरुमरीचिकायां ए
जलाभावज्ञानेऽपि जलभानवत् अथवा मुक्तेषा लेहके होत्तरकालेऽपि नाशाभावात् प्रारब्धस्याज्ञाननाशेऽपि स्थितिः संभवतीति प्रार
ब्धनाशः प्रमाणाभावात् अपि न संभवतीति चेन्न भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति य
थैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा इत्यादिस्मृतिसिद्धत्वात् तस्मात्प्रारब्धनाशो

ज्ञानस्यारब्धकर्मणां नाशने सामर्थ्यविरहो न संभवति ३

ज्ञानसामर्थ्यस्य चोभयत्र तुल्यत्वात् बहुत्वैकत्वज्ञानं हि प्रारब्धो
नप्रमाणाभाव: अज्ञानस्याविद्याविरोधकत्वकार्यत्वाविरोधत्वाविशेषात्
दृष्टाकपूर्वकं अस्य पूर्वकृतं पापं दृष्टं नदनिवृत्तिवदिति तत्त्वज्ञानेन सर्वकर्मदाहस्मरणात् न चैतद्दाक्यमनारब्धकर्मनिवृत्तिपरमेवेति वा
त्वं कर्मप्रारब्धस्योभयसाधारणत्वात् न च ज्ञानमज्ञानस्यैव निवर्तकमित्यवधारणं प्रारब्धकादिणमेवं सत्यसमं तत्समिति वाच्यं अज्ञानकार्यस्या
त्मज्ञानानिवर्तकात् न हाधेन तत्त्वानुपलंभावात् तस्मात्स्वयंप्रकाशज्ञानरूपात्मनो ज्ञाननिवर्तकत्वमेव विशिष्टस्यैवात्मनो ज्ञानसाध
कत्वाद्वित्याह यथेति यदुक्तं कारणाभावेपि कार्यस्थितिरस्तित्वन्न स्वप्रभमकारणनिद्रादोषस्याभावे स्वप्रभ्रमादर्शनात् यत्तु सर्पभ्रमाभा
वेपि कार्यभयकंपाद्यनुवर्तने तदपि भ्रमस्योपादानानुवृत्तित्वमेव तत्कृतापरस्यैव तत्त्वभानाभावात् कर्तृकर्मोपादानस्य दृष्टो: तत्त्वारो

कर्मजन्मांतरीयं यत्प्रारब्धमिति कीर्तितम् तत्तु जन्मांतराभावात् पुंसो नैवास्ति कर्हिचित् ४२

ननु प्रारब्धं
नाशेनान्यथा तस्मात् ज्ञानाभावे प्रारब्धस्थिति: कुत: न कश्चापि इति कारणाभावे कार्यस्य स्यान्नमशक्यत्वात् इत्यलम् ननु प्रारब्धं
नैव विद्यते देहादीनामसत्यत्वादिति व्यधिकरणो हेतुरिति चेन्न अज्ञानोपादानकत्वेपि प्रारब्धकर्मणां जन्मांतरोपितस्य निमि
त्तकारणमनो ज्ञानाभावे जन्मांतरस्याप्यभावात् न व्यधिकरणो हेतु: तस्य तावदेव चिरमिति श्रुतिस्त्वज्ञप्ररोचनार्थमित्य
नुसंधेयं ४१ तदेव दर्शयति कर्मजन्मांतरीयमिति जन्मांतरे पूर्वजन्मनि यत्कृतं कर्म धर्माधर्माख्यं विहितनिषिद्धं तदेत
ज्जन्मारंभकत्वात् प्रारब्धमिति कीर्तितम् तत्तु पूर्वोक्तप्रकारेण पुरुषस्य प्रत्यगात्मनो ज्ञानाभावे जन्मांतरस्याप्यभावा
त् कारणाभावे प्रारब्धस्य स्थिति: कुत: अत एवोक्तम् पुंसो नैवास्तीति ४२ रामाय नम: ॥ १९

पुनरपि दृष्टान्तेन द्रढयति स्वप्न इति स्वप्ने यथाध्यस्तस्य शरीरस्य तदारंभस्य प्रारब्धकर्मणश्च प्रतीतिमात्रत्वमेव प्रतीतिव्य
तिरेकेण पृथक्सत्त्वानुपलंभात् तथा जागरेपि विशिष्टस्याज्ञानकार्यत्वेनायं देहोपि प्रतीतिमात्रमेव तथा च प्रतीतिमात्रस्य पूर्वाप
तिरि रत्वमत्स्कल्पयितुमशक्यत्वात् कुतो जन्माभावे प्रारब्धस्थितिः तस्मात् प्रतीत्यभावात् लब्धसत्ताकस्यैव स्थित्यपेक्षणात् किंच किमिदं
देहादिप्रपंचः कार्यमकार्यं वा नांत्यः हैतापत्तेः प्रपेक्षानिवृत्त्याः निर्मोक्षप्रसंगात्वाच्च आद्ये किमस्य कारणमज्ञानं ब्रह्म वा नाद्यः ब्रह्मणः पूर्वम प्र
नपरमिति श्रुतेः ब्रह्मणो कार्यकारणभावप्रतिपादनोत् नेह नानास्ति निषेधानुपपत्तेश्च अज्ञानं चेत् तर्हि वेदांतैस्तत्त्वमस्या

स्वप्ने देहो यथाध्यस्तस्तथैवायं हि दैहिकः अध्यस्तस्य कुतो जन्म जन्माभावे कुतः स्थितिः ९३ उपादानं प्रपंचस्य मृद्भांडस्येव
पश्यते अज्ञानं चैव वेदांतैस्तस्मिन्नष्टे क्व विश्वता ९४ यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् तद्वत्सत्यमविज्ञाय जग
त्पश्यति मूढधीः ९५

दिवाकैरवाक्यैः ज्ञाने विनष्टे क्व विश्वता विश्वं क्व गतं दृतिन ज्ञानामीति ९४ उपादाननाशस्योपादेयनाशप्रयोजकत्वादित्याह उपादान
मिति तथा घटशरावाद्युपादानं मृद्भावे तदभावे घटाद्यनुपलंभादित्यर्थः यथा तन्तुनाशे पटस्यानुपलंभवद् ज्ञाननाशे नाका
शादिप्रपंचस्याप्युपलंभाभावात् प्रारब्धस्थितिः कस्मिन्नवकाशे तत्त्वज्ञानिनामित्यर्थः ९४ यावद्ज्ञानसद्भावस्तावत्प्रपंचदर्शनमित्याह
यथा रज्जुमिति यथा येन प्रकारेण कश्चित्पुरुषो रज्जुज्ञानेन रज्जुं परित्यज्य भ्रमात्तस्मिन्सर्पं गृह्णाति तथा स्वस्वरूपाज्ञानेन स्वा
भिन्नं परं ब्रह्म स्वयंप्रकाशं सत्यमपि तमविज्ञाय मूढधीरविवेकी अनात्मतः देहादिजगदात्मत्वेन पश्यति यथा चक्षुरिंद्रियदो
षेण शंखे पीतत्वादिभानं तद्वदिति भावः जगत्पश्यतीति ९५ राम राम विद्या

अप० अधुनाधिष्ठानज्ञानेनतदभावमाह रज्जुरूपे इति अत्यन्तमभिन्ने ब्रह्मस्वरूपे अधिष्ठाने ज्ञाते साक्षात्कृते प्रपञ्चे शून्यतां गते सति यथा च
२० ह्यरादिप्रमाणैः रज्जुनिश्चये सर्पखण्डं न तिष्ठति न दृश्यते तद्वत्प्रारब्धात्मकशरीरस्थितिर्नेत्याह प्रारब्धेति तथा च श्रुतिः ब्रह्मविद्ब्रह्मै
व भवति ह्यनादेवन्नुवैवत्स्यमिति यद्यज्ञाननाशेन प्रारब्धमपि नश्यति किमर्थं तर्हि तस्य तावदेव चिरमिति श्रुत्या प्रारब्धस्थि
तिरुक्तेति चेन्न तत्राह अज्ञानिजनबोधार्थमिति तदेवदर्शयति देहस्यापीति ननु आकाशादिप्रपञ्चस्यासत्यत्वेऽपि स्वकीय
ये देहे सत्यतास्यादिति चेन्न तस्यापि प्रपञ्चाविलक्षणत्वमाह देहस्यापीति देहादेरपि प्रपञ्चान्तर्गतत्वात् लक्षणान्तरस्याभावात् तस्य स्वरूपा
नभिज्ञाः तेषामेवबोधनार्थं श्रुतिषु प्रारब्धकथनमित्यर्थः ९६ ९७ ननु ज्ञाने ज्ञानेऽपि प्रारब्धस्थितिर्विदुभिः शास्त्रकारैरेवाङ्गी
कृता युक्तिभिर्निरूपिता चेति चेन्न तन्निषेधो श्रुत्यापरवगीकृतत्वात् तदेवदर्शयति क्षीयन्ते चास्येति अस्य ज्ञानिनो सर्वकर्माणि क्षीयन्ते नश्यन्ति

रज्जुरूपे परिज्ञाते सर्पखण्डं न तिष्ठति अधिष्ठाने तथा ज्ञाते प्रपञ्चे शून्यतां गते ९६ देहस्यापि प्रपञ्चत्वात्
प्रारब्धावस्थितिः कुतः अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ९७ भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंश
याः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ९८ [illegible]

परावरे ज्ञाने सति गरावरे अशुद्धनिरतिशयाद् ब्रह्म तथा च श्रुतिः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित् सा काष्ठा सा परा ग
तिरित्यादिः नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवमित्यादिस्मृतिप्रतिपादितोऽपि परो दृश्यमान एव वा वरो जीवोऽज्ञानोपाधिकः स्थूलसूक्ष्मप्रपं
चात्मत्रिस्थितिप्रलयाधिष्ठानं सर्वसाक्षीतिभाति तथा च श्रुतिः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः पर
त्वयेकीडति यस्यावीक्षतस्मात्तदस्य ज्ञानेन सकलं विचित्रमित्यादिः स्मृतिरपि तथैव सकलं ज्ञानं तथापि सर्वप्रवर्तते इति इदं शरीरं कौन्तेय
क्षेत्रमित्यभिधीयते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः देही नित्यमवध्योऽयं देहे सर्वस्य भारतेत्यादि श्रुतिस्मृतिसिद्धत्वं परा
वरयोरैक्यं यद्वा परोऽपि ईश्वरो वरो यस्मात्स एव परावरो ब्रह्म तस्मिन्परावरे दृष्टे सर्वकर्मदाहस्मरणात् अन्यकाज्ञानोपाधिको जी
वो व्यवकण्व युष्मान्मत अभिमतः परन्तु जीवैक्यं न संभवति एकेनानेकदेहचेष्टानुपपत्तेः शरीरान्तरकृतकार्यानुसंधानप्रसंगाच्च

स्मात्तैः देहचेष्टावैचित्र्यान्यथानुपपत्तिप्रसूचितार्थापत्त्या जीवनानात्वमेव किं न स्यादिति चे चेष्टा हि तच्छरीरवर्त्तिनी स्वात्मसमवायिकारणं
प्रयत्नवदात्मसंयोगमपेक्षते संयोगविशेषणं चात्मात देकोवानेको वेत्यनेकत्वात्तत्तोऽन्यथानात्मनोभेदोनुमीयते एकेनैवस्वप्र
दृष्टानेकशरीरचेष्टोपपत्तेः स्वप्नदृष्टत्वाच्च अनुमानेनाप्येक एवात्मासिद्ध्यति तदेवदर्शयति अनेकशरीरवर्त्तिन्याश्चेष्टायाः कात्मसंयो
गासमवायिन्या चेष्टात्वात् एकशरीरचेष्टासुसाध्याव्यापकत्वात् एकात्मसंयोगासमवायित्वं वर्त्तते स्वापकाशानैकशरीरनत्त्रैकु
शरीरमात्रनिष्ठचेष्टात्वं नास्ति अतोनोपाधिर्यस्मादेकशरीरनिष्ठचेष्टात्वं चोपाधिः तस्मादेकैनैवात्मनानेकदेहचेष्टोपपत्तिरेवेति
र युक्तं आत्मैकत्वे शरीरान्तरकृतकार्यानुसंधानप्रसंगः स्यात्तदपि नस्वप्नस्रष्टुर्देवैकत्वेपि शरीरान्तरकृतकार्यानुसंधानाभावेपि द्रष्टैकत्वमे रा
वयथानद्वत्रापि आत्मनः शरीरान्तरकृतकार्यानुसंधानाभावेप्येकत्वमेवेकात्मतानन्तहानिरित्तिनिर्दिदम् तत्तेनानुसंधानेनुज्ञानेक
स्मिन्शरीरभेदादित्यर्थः अपवानुष्ठानद्द्रजनन्यायेन अज्ञानमात्रोपहितस्य साक्षिणस्सर्वानुसंधानोपपत्तिरेव तत्तदवच्छिन्नस्य
तु ... स्यावृकदेहेप्यननुसंधानात् अतएवैकस्मिन्नपि देहे पादावच्छिन्नः शिरावच्छिन्नस्य दुःखनानुसंधत्ते पादे सुखं शि
रसि मेवेदनानुत्पनुभवात् तदेतत्सर्वांक्तं जीवाभेदसंग्रहश्लोकः अज्ञानमेकमेवास्तु जीवोप्येकस्तथैव च उपाधिविषयोरेकस्सर्वहि
तेकप्रयोजकमिति जीवभेदानुभवस्तु देहात्मभ्रमसाक्षिकत्वेव तस्मादेकमेवहि नित्यशुद्धबुद्धमुक्तस्वभावमपि सन्तज्ञानमा
श्रित्य जीवभावं लब्ध्वा देवादिदेहान्प्रकल्पनत्तद्देहेषु देहादीन् जीवाभासान्प्रकल्पनथैव स्वं वीरमपि भासप्रकल्पवघमोहद शा
प्रतिपादकशास्त्रप्रमाणार्थमहमपि ब्राह्मणो कुमारोधिकारीतिपाममेव प्रसान्ते रोग्यादि चतुष्टयसाधनानिकृत्वास्रवणा दा
दिसंपाद्यमोक्षसाधयिष्यामि वसिष्ठवामदेवशुकादयोमुक्ता अन्येवद्धाश्वमपिवद्धस्तोभविष्यामीत्यज्ञानवशाज्जीवादिश्चाव्यमि
धेयाभवतीति न काप्यनुपपत्तिरित्यर्थः नन्वेवं प्रारब्धनिषेधेपि जीवन्मुक्तिप्रतिपादकागमविरोधप्रसंग आयातीति तस्मात्तानि
तोदेहस्थितिः स्वीकर्त्तव्या सा च विनैव प्रारब्धकर्मणः संभवत्यतो ज्ञानेत्तानेपि प्रारब्धकर्मस्थितिरावश्यकीति चेन्न अध्ययनविधि
विरोधात् प्रयोजनवदर्थमुद्दिश्याध्ययनं विधत्ते वेदवाक्यानामागमस्यचज्जीवन्मुक्तिप्रतिपादने प्रयोजनाभावात् नचस्वतः प्रयो

ज्ञानाभावात् न च स्वतः प्रयोजनाभावेऽपि श्रवणादौ मुमुक्षुप्रवृत्तिरेव प्रयोजनं इष्यते इति वाच्यं श्रवणादि विध्यर्थवादत्वप्रसंगात् न चारब्ध
म्र॰ स्य जीवन्मुक्तप्रतिपादकवाक्यानां स्वार्थपरत्वाभावात् किंच सति श्रुतिसाक्षात्कारे सविलासाविद्योपमर्दः तद्भावेन इत्यादि श्रुत्यन्वयव्य
२१ तिरेकाभ्यां ज्ञाने ज्ञाने सविलासाविद्योपमर्देनैव प्रारब्धकर्मणोऽप्यभावसंभवात् कथं विदुषो देहस्थितिकल्पने न च जीवन्मुक्तौ सर्वलौ
किकी प्रसिद्धिरस्ति इत्यनेन तद्वाक्यं प्रमाणाभावेन न स्यात् न्यायत्वात् नन्वनारब्धकार्ये एव तु पूर्वे तदवधेरिति सूत्रकारैः नन्वारब्धकार्यसाम्
क्ति फलेत्यादि भाष्यकारैः नन्वारब्धविपाकसंपादितत्वात् आयुष्यवित्यादि वाचस्पतिमिश्रैः एवं शास्त्रकारैः प्रतिपादनं व्यर्थं स्यादिति चेन्न
शिष्यस्याविद्वत्त्वानुरागविष्वक्सपरिहारप्रयोजनत्वात् अन्यथा नत्वादिनस्याप्यर्थवत्त्वात् तस्माद्विद्वान् सद्योमुक्तिरेव ननु सद्योमुक्तावुपदेष्टुर
भावे कुतो विद्योत्पत्तिः न च विनैवाचार्यं विद्योत्पत्तिः संभवति आचार्यवान् पुरुषो वेद नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्याद्याचार्यसं
गतिवन्नेति अनन्यप्रोक्ते गतिरत्र नास्तीति प्रक्रान्ते नैव सुज्ञानाय प्रेष्ठ इत्यादि श्रुत्या आचार्यो वा विद्या त्वत्संभवात् इति चेन्न ईश्वरे
नैव तिमिरे दोषः कल्पितेनापि उपदेशस्य यथा शास्त्रं समाधेयत्वात् न चानाविनिर्मोक्षो विद्यावत्त्वेन निर्णीयात् यथा कल्पितेनापि वेदस्या
र्थबोधजनितत्वदाचार्योऽपीत्यर्थः तथा च श्रुतिः विमुक्तश्च विमुच्यते नियतं च मियते इत्यादि बुध्यापि नेप्रतितु प्रतिबिंबमेवेति उत
रं यथा कल्पितेनापि प्रतिबिंबः सत्यबिंबलाभ जनकमिति न तदाचार्योऽपि स्वजनकत्वेन स्वविद्यामित्यर्थः ननु वेदस्यापि कल्पितत्वे शास्त्रप्रा
माण्येऽप्रसंगः स्यादतः पारब्धत्वप्राप्तमिति चेन्न आत्मभिन्नशास्त्रसत्त्वं येऽमन्यन्ते तान्प्रत्ययं दोषः स्याच्छान्ति नास्माकं आत्मभिन्न
नेन आत्मभिन्नशास्त्रप्रामाण्यस्यानंगीकारादित्यर्थः नन्वहं ज्ञातेऽन्तरं प्रारब्धाभावे वसिष्ठादीनां स्मृतिरपि यथापूर्वं न मादीप्तं ना
प्स्यन्ति मगादीनाः न दृष्टवेविदोदोषा नाश्रयंति कदाचनेति यदि च तद्वत् शास्त्रकारैः प्रारब्धस्थितिरुच्यते तदा दैनापत्या
ऽप्रसिद्धान्तः स्यात् तानेतान् बाधकाभावात् ४२

नदेवदर्शयति उच्यते तैरिति यदि तैः पण्डितैः शास्त्रकारैः श्रुतिस्मृतिबलेन प्रारब्धक्षयपर्यन्तमिति उच्यते तदा ज्ञानसद्भावात् देहनाशपर्यन्तमेव वादि
नीयं ब्रह्म नेह नानास्ति किञ्चनेति श्रवणमुपगम्य महानिष्ठा स्यादित्याह वेदान्तमतहानं चेति ९९ अथ पूर्वोक्तस्यात्मस्वरूपस्य प्राप्त्यर्थं साध
नानि तानि वक्ष्ये चित्तैकाग्र्यमात्रपर्यवसायीति अतः श्रवणमननार्थं वैराग्यादिसाधनचतुष्टयमभिधाय इदानीं निदिध्यासनप्राधान्यं प्र
वर्णयन्तरकाले एतान्यत्र श्रवणे नैव शक्यानीत्याह तैश्च सर्वैरिति नैरन्तर्येण साधनैः सदा सर्वदा निदिध्यासनमेव कार्यं नाम करणीयमित्य
र्थः १०० यतो मनोऽनन्त्यर्थं चलं तस्मादभ्यासेन विना स्वरूपप्राप्तिर्न भवतीत्यर्थः नित्याभ्यासादृतेनेति तद्गतमौनाख्यपि अत्र संशयेन
र्नि ता वा हा मनो दुर्निग्रहं चलं अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते इत्यादि तस्मात् जिज्ञासुभिः स्वकल्याणार्थं अविलम्बेन यतनीयमित्या

उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः ९९ त्रिपञ्चाङ्गान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये
सर्वैः तैश्च सदा कार्यं निदिध्यासनमेव तु १०० नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रे
यसे चिरं १ यमो हि नियमस्त्यागो मौनं देशश्च कालतः आसनं मूलबन्धश्च देहसाम्यं च दृक्स्थितिः २ प्राणसंयमनं चैव प्र
त्याहारश्च धारणा आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् ३ सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः यमोऽयमिति
संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ४

दिभिः सर्वदाभ्यासेन सच्चिदात्मस्वरूपप्राप्तिर्न संभवतीत्यस्मिन्नर्थे भगवद्वाक्यं प्रमाणयति असंयतात्मना योगो दुष्प्राप इति मे
मतिः वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः इति यस्मादेवं तस्मान्निदिध्यासनशीलैर्जिज्ञासुभिर्नित्यमेवात्यवधानेनात्मप्राप्त्यर्थमि
दमेवाभ्यसनीयमित्यर्थः २ अङ्गानां संख्यामाह यमो हीत्यादिद्वाभ्यां २ ३ संज्ञाकथनानन्तरं तेषां लक्षणं प्रकाशनार्थं तावद्यमस्य
लक्षणमाह सर्वं ब्रह्मेति सर्वं खल्विदं ब्रह्मेति श्रुत्या ब्रह्मणोऽभिन्नं किञ्चिदपि नास्तीति निश्चयेनेन्द्रियग्रामस्येन्द्रियसमुदायस्य या
संयमः शब्दादिविषयेषु प्रीत्यभावः स एव यमो ज्ञातव्यः मुहुर्मुहुः प्रतिक्षणमभ्यसनीयमित्यर्थः ४ ५ ५ ५२ रामल्ली

अ० ११ यमकथनादूर्ध्वं नियमस्य लक्षणमाह सजातीयप्रवाहश्चेति सजातीयस्य प्रत्यक्चैतन्यस्वरूपं घटपटे ब्रह्माहमित्याकारवृत्तेः प्रवाहस्तया
हं ब्रह्मास्मीति तैलधारावदखण्डैकरसविच्छेदरहितं विजातीयानात्मनो देहेन्द्रियादितिरस्कारपूर्वकं यथावस्थानं तदेव नियमो ता
तद्यथा वुद्धौ ऽनैरन्तर्येणैव कार्यं करणीयमनुभवे विवेकरहितैरित्यर्थः कीदृशः पुनः परमानन्दस्वरूपो मोक्षस्थानं गम्यत्वादस्य
स्मानं रसा वाच्यः ननु अनधिगताबाधितार्थगन्तृ प्रमाणमिति प्रमाणलक्षणं भवतां मते अहं ब्रह्मास्मीति धारावाहिकबुद्धिस्थले
नन्तरोत्तरज्ञानानां गृहीतग्राहकत्वात् प्रामाण्याभाव इति चेन्न धारावाहिकबुद्धिस्थले विषयस्य तत्तत्क्षणविशिष्टविषयत्वेनानानत्वा
न च तत्कालस्य निरूपत्वेनातीन्द्रियत्वात्कथं प्रत्यक्षविषयत्वमिति चेन्न स तस्मिन्काले स्पष्टनिरूपणेऽपि इदानीमित्यनुभवादेव

सजातीयप्रवाहश्च विजातीयतिरस्कृतिः नियमो हि परानन्दो नियमात्क्रियते बुधैः ५ त्यागो प्र
पंचरूपस्य चिदात्मत्वावलोकनात् त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ६

प्रत्यक्षविषयत्वात् किंच धारावाहिकबुद्धिस्थले न ज्ञानभेदः किंतु यावत् घटस्फुरणं तावत् घटाकारान्तःकरणवृत्तिरेकैव न तु नाना वृत्तैः
स्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात् इत्येतल्लक्षणमव्यभिचारि इत्यर्थः ५ यथा त्यागस्य लक्षणमाह त्यागो प्रपंचरूपस्येति ऊह
दजहल्लक्षणया वृत्तिर्वा नानादिरूपं अवलोकनात् नाहं देहः तस्य प्रपंचस्य त्यागोऽपि तत्पदार्थस्य इति तस्मात् त्यागः सद्यो मोक्षमयो महा
त्मकमेव महतां साधनवतामेव पूज्यः सेव्य इत्यर्थः ननु प्रपंचस्य त्यागो न संभवति सर्वं खल्विदं ब्रह्मेति श्रुत्या ब्रह्मस्वरूपत्वस्य व
त्याग इत्यत्रात्यागविषयत्वात् भावरूपप्रसङ्गादित्याह इति न हि वंध्यापुत्रस्याकाशपुष्पस्य वा त्यागो केनचित्कर्तुं शक्यते इति चेन्न
नेह नानास्तीति श्रुत्या प्रपंचस्य प्रतिपन्नोपाधौ त्रैकालिकनिषेध इति यथा नित्यत्वेन तुच्छत्वमेव तथापि सा त्यागकारान्न पूर्वं न तु चरद
दृष्ट्या सवितर्क तन्मात्रं ज्ञानकाले नित्यानित्यविवेके नानिर्वचनीयतां गमी इत्यनन्तरमस्य अहं ब्रह्मास्मीत्यादि ज्ञानेन नास्ति २२

रूपत्वेनीयेन प्रकारेण मौनं कर्तव्यं यन्मौनं ब्रह्मस्वरूपमेव विचारद्वारा तन्मयत्वेन भवितव्यं तदुपायमेव दर्शयति यतो वाचो निवर्तन्ते इत्यादि
भिः यस्माद् अधिष्ठानस्वरूपत्वात् वाचो निवर्तन्ते अविषयत्वात् यन्मौनं ब्रह्मस्वरूपत्वेन वाचामगोचरं ब्रह्म विदुः स्वाभाविके लक्ष्य
णे नेवं ममत्वाणान्यभ्यासेन विशिष्टेन सम्यग्भक्तिकाः क्रमेणाय तेनैव भवितव्यमित्याह यन्मौनमिति भक्तिका प्रकारं दर्शयति ज्ञानम
किं प्रमेयस्यास्याप्रपञ्चस्य सम्प्रदायहता विचारणादिनी यान्तनी यान्तनुमानसा सत्त्वा पतिश्च तस्थीस्यान्तनो संसक्तनामका प्रत्यर्थाम
वनी यस्मी सप्तमी तु यमास्मरता इति वाक्संयमरूपं मौनं तु मूर्खबालानामित्याह गिरा मौनं त्विति बालप्रावेनसाधनं च तु एयशीला
नां महतामित्यर्थः ननु मौनं नाम सर्वदा वागिन्द्रियव्यापारस्याभावः स च वागिन्द्रियवैयर्थ्यं च सन्यासेऽकर्तव्यं मौनमिति विचार्य यस्माद्

यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह । यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः ॥ १ ॥ वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्य
ते प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥ २ ॥ इति वा तद्भवेन्मौनं सतां सहजसंज्ञितं । गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवा
दिभिः ॥ ३ ॥ आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते । येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ १० ॥

वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्या आत्मनो निर्धर्मकत्वेन वागाद्यविषयत्वं निश्चित्य तद्रूपं यत्स्यात् नात्मनः स्थावर जंगमस
त्वाणप्रपञ्चस्याप्यनिर्वचनीयत्वात् न मन्त्रासक्तापि उभयकिन्नाहं मिथ्यात्वेनानिवर्तनं तत्र शक्यं न स्यात् सर्वदा वागिन्द्रियव्यापाराभावात् मौनमिति सिद्धि
मित्याह प्रपञ्चो यदीति ननु यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुत्या लाक्षिकवाक्संयमरूपमननसाधनं निषेधानन्तरं प्रपञ्चस्य
नसौ ज्ञानं तदेवाहमिति श्रुतिव्याकोपः स्यादिति चेन्न तत्र श्रुतेः पूर्वमेव निरस्तत्वात् लक्षणास्पदत्वं सत्ये ग्रन्थे सति बाधके लक्षणा न तु मुख्या
वाधे प्रीत्यर्थः मनसैवेति श्रुतिस्तु विशिष्टविषयैवेत्यर्थः ॥ २ ॥ ३ ॥ एवं क्रमेणाक्षरमेव निर्विकल्पसमाधिस्तु देशान्तरं दर्शयति
दर्शयति आदावन्ते चेति यस्मिन्नधिष्ठाने जनः प्रावृत्ताः वाच्यः प्रपञ्चः कालत्रयेऽपि नास्ति येन व्यापकेन च सर्वमिदं नामरूपादिकं जगत्
रज्जुसर्पवत् व्याप्तं निरंतरं नित्यमेव सोऽप्यधिष्ठानस्वरूपो देशो विशेषेण बुधैर्विजनः जनवर्जितः कल्पितानामभावोऽधिष्ठानमेवेत्यर्थः ॥ ४

श्लो०
३३ पृथक्कालोऽपि ब्रह्मैवेति दर्शयति कलनादिति कलनात् सर्वभूतानां स्थावरजङ्गमानां ब्रह्मणो निमेषरूपात् यस्मिन्नेव कारणत्वमेतेषां संहा-
रेतान्यस्मिन्नेतैः सर्वं ज्ञानं समव्ययं न देशकालशब्देनापि प्रसिद्धः तदुक्तं गीतास्वपि कालोऽस्मि लोकक्षयकृत्प्रवृद्ध इति ११ सुखासनमपि सि-
माध्यमेनापि ब्रह्मैवेत्याह सुखेनैवेति यत्र बुद्ध्या सर्वभूतानामादिकारणं पूर्वेभ्यः शास्त्रेभ्यः प्राचार्यैर्भाष्यकृद्भिः यतो वा इमानि भूतानि
जायन्त इत्यादि तस्मिन् ब्रह्मस्वरूपे प्राप्ते निदिध्यासनेन स्मरणं मुमुक्षवः समाविष्टाः संप्राप्ताः तेषां सुखस्थितिं तदेव ब्रह्माहमस्मीति
चिन्तनं भवेन्नान्यस्मिन्निति तदन्यत्सर्वं दुःखरूपमेवातोऽन्यदार्तमिति श्रुतेः १२ पुनरपि सिद्धमन्त्रं सर्वभूतादीनि युक्तान्यात्मसर्व-
भूतानामादिः स्वतःसिद्धत्वात्सर्वाधिष्ठानत्वाद्व्ययं न विद्यते विनाशाद्यन्तः रूपतो वयस्तो वा यस्य तदव्ययमित्याह यस्मि-

कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः। कालशब्देन निर्दिष्टं तत्सर्वं ज्ञानं समव्ययं ॥११॥ सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्म-
चिंतनं। आसनं तद्विजानीयादितरं सुखनाशनं ॥१२॥ सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययं। यस्मिन्सिद्धाः स-
माविष्टास्तद्वै सिद्धासनं भवेत् ॥१३॥ यन्मूलं सर्वलोकानां यन्मूलं चित्तबंधनं। मूलबंधः सदा सेव्यो योग्योऽसौ राज-
योगिनां ॥१४॥ अंगानां समतां विद्यात्समे ब्रह्मणि लीयते। नाचेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥१५॥

त्वसिद्धा इति सिद्धा एव हि येमाबाधयन्तेति मुमुक्षव इत्यर्थः समाविष्टाः संप्राप्तास्तद्वै सिद्धासनं सुखमासनमारूढा इत्या-
ह तद्वै सिद्धासनं भवेदिति १३ मूलबंधमपि दर्शयति यन्मूलं सर्वलोकानामिति तस्माद्वा एतस्मादात्मन आकाशः संभूत इति
श्रुत्या सर्वलोकानां ब्रह्मादिस्थावरान्तानामाविर्भावाधिष्ठानत्वेन ब्रह्मैव कारणं मूलमित्यर्थः तस्मात्तद्राजयोगिनामयमे-
व मूलबन्धः चित्तैकाग्र्यरूपतया सर्वदैव सेव्यम् १४ सेवनीयमंगानामित्याह अंगानां पाणिपादादीनां सर्वेषां समे नि-
र्विशेषे ब्रह्मणि सर्वाधिष्ठाने स्वकारणे विशालये तल्लयदर्शितरूपतामेव समतां विद्यात् विजानीयात् शुष्कवृक्षवदेव ऋजुत्वमपीत्याह

तेनैव समतायुक्तेन पुरुषेण यत्कर्तव्यं तदाह दृष्टिमिति दृष्टिं ज्ञानमयीं कृत्वा पूर्वोक्तप्रकारेण सर्वं ब्रह्मेति कृत्वा तया दृष्ट्या ज्ञान
स्वरूपया चराचरात्मकं जगत्सर्वं ब्रह्मविवर्तत्वात् ब्रह्ममयं ब्रह्मस्वरूपं पश्येत् ततोऽन्यत्किंचिदपि नास्तीति निश्चयवतीया दृष्टिः
सा एव परमोदारा उत्कृष्टा ज्ञेया अज्ञानध्वान्तनिवर्तकत्वादित्याह सा दृष्टिरिति नासाग्रावलोकनं न कुर्यात् यतो नासाग्रस्य ज्ञानका
र्यत्वादज्ञानमेव द्रष्टृदर्शनदृश्य [illegible] मित्याह न नासाग्रवि[illegible]लोकिनीति १६ किंचान्यदपि द्रष्टृदर्शन[illegible]नामपि
नि यस्मिन्नधिष्ठाने ज्ञातृज्ञानज्ञेय ध्यातृध्यानध्येय [illegible] प्रमातृप्रमाणप्रमेयादीनामेव द्रष्टृदर्शनदृश्यानामपि शमो यत्र

दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् सा दृष्टिः परमोदारा न नासाग्रावलोकिनी १६ द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत् ॥
दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी १७ चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते १८
निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः १९

त्रादिभानेपि मज्ञानवत् विरामोऽभावोऽस्तीति भावयेत् तत्रैव तस्मिन्नेव स्वरूपे दृष्टिः कर्तव्या न नासाग्रावलोकिनीति भावः १७ अथ
प्राणायामप्रकारमाह चित्तादिसर्वभावेष्विति चित्तादिसर्वभावानां स्थूलसूक्ष्मपदार्थानां कार्याणां मूलकारणविद्याल
यक्रमेण दर्शनेन सर्वभावेषु ब्रह्मादिस्थावरान्तेषु ब्रह्मत्वेनैव भावनाच्च ब्रह्मचिन्तनमेतादृशः सर्ववृत्तीनां निरोधः स
एव प्राणायामः १८ सोपि रेचकपूरककुंभकभेदेन त्रिधा उच्यते वक्ष्यमाणश्लोकद्वयेन निषेधनं प्रपंचस्येत्यादिना अज्ञानकार्यस्य
अपि प्रपंचस्यात्माभावेयोऽभाव निश्चयः स एव प्रपंचस्य निषेधरूपो रेचकाख्यो प्राणायाम उच्यते ब्रह्मवादिभिरहं
ब्रह्मास्मीति स्वीकाररूपवृत्त्युत्पादनरूपो पूरको वायुरीरितः कथितः प्रदायविद्भिरित्याह ब्रह्मैवास्मीति १९ ॥ ओं
सं

अप०
२४

ते

पुनः स्वस्वनैश्चल्यमाह ततः सद्वृत्तीति पूर्वोक्तावृत्तेर्नैश्चल्यं कुंभकाख्यो प्राणायामः प्रबुद्धानां विषयासक्तचित्तानां तु प्राणादीनां पीडनमे
व प्राणायाम उच्यते इत्याह अज्ञानामिति ब्रह्मादिस्थावरांतेषु विषयेष्वात्मतया धिष्ठानात्मस्वरूपादृष्टिः सैव प्रत्याहार उच्यते वि
षयेष्विति पूर्वोक्तेषु ब्रह्मदृष्टिर्ब्रह्मैवात्मा नमात्मनि त्यविषयाकारेणाभाति अतो ब्रह्मैवेदमिति रज्जुविवर्त्तसर्पादिषु रज्जुदृष्टिवत्साधा
नवत् दृश्यसंपन्नेनैव मुमुक्षुणा अभ्यसनीयः करणेन प्रतिक्षणं सदैव कार्या न वाक्ये ज्ञानस्वरूपमेवाह ततः चितेन चित्तेन ततः अधिष्ठानस्वरू
पे मज्जनं पश्यत्यन्येकु दृश्यमिति २० २१ इदानीं धारणायाः स्वरूपमाह यत्र यत्र मनो याति येषु येषु विषयेषु मनो स्वाभाविकधर्मे नी
णयाति गच्छति तस्य तस्यापि विषयस्यारोपितत्वादधिष्ठानमेदेन प्रत्यनतया ब्रह्मात्मदर्शनं यथेन्द्रजालगगनव्याघ्रादीन्पश्यन्ना

ततः सद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः अयं चापि प्रबुद्धानामज्ञानां प्राण,,,,पीडनात् २० विषयेष्वात्मतां दृष्ट्वा मनस
श्चितिमज्जनम् प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः २१ यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् मनसो धारणं चै
व धारणा सा परा मता २२

पि मेधावी इन्द्रजालमेव पश्यति नव्याघ्रादीन् दृढसंस्कृतेन मनसा ब्रह्मैव सर्वमिति या प्रतीतिः सैव धारणा परा उत्कृष्टा मताः भिप्रेते
त्यर्थः ननु पूर्वं नेह नानास्ति श्रुत्या आकाशादिप्रपंचस्य त्रैकालिकनिषेधः प्रतिज्ञायाधुना तस्यैव ब्रह्मस्वरूपत्वनिर्देशात् तथा
चोभयोरपि विधिनिषेधयोर्वेदप्रतिपाद्यत्वात् कस्मिन्नर्थे निश्चयस्य साफल्यमिति संशयान् प्रत्याह उभयोरपि विधिनि
षेधयोरेकार्थत्वात् कथं तर्हि व्यवस्थिति रेदुच्यते विधिरेवातिशयत्वादित्याह यद्यप्युभयोरेकार्थत्वं तथापि विधिरेव दृश्य
मानानां घटपटादीनां यास सत्तासाप्यात्मैव परिपूर्णेति साक्षात्कारहेतुत्वादतिशयः निषेधस्त्वर्थान्निषेधाधिष्ठानत्वात्तदु
क्तत्वमितिभावः ननु तर्हि कि तेनैव पुरुषार्थपर्यवसितत्वादुभयप्रतिपत्त्यर्थत्वमितिचेन्न अधिकारिभेदेनोभयोरप्यौचित्यं
तथाहि संसारदुःखेनात्यंतोद्विग्नमनस्तन्निवृत्तिमेवादौ कामयमानस्तं प्रति नेह नानास्तीत्यादिनिषेधप्रतिपादकवाक्य

दे

२५

मेव ध्यातव्यमीयं पश्चाद्विधिवाक्यं यस्तु सन्दिग्धः सन्निकृष्टमस्यत्वगतस्त्वं इत्येव निश्चितास्तु: नेत्यन्यादेः सर्वं खल्विदं ब्रह्मेत्यादि
वाक्यं विधिरूपमेव प्रयात्तनीयं पश्चान्निषेधवाक्यमिति विशेषणद्वयस्य फलितः यथा सर्पोऽयं प्रध्यस्य तत्प्रतीकारं ज्ञानान्निर्भयः
पृच्छति किमिदं पुरोवर्तीति न पुनर् रज्जुरित्येवान्तरं तस्मादुभयोरूपयोगात्मकस्य विधेयः पूर्वमित्यर्थः ननु सर्वं खल्विदं ब्रह्मेत्यादि
विधिवाक्येनात्मनः सर्वात्मकत्वप्रतिपादने दुःखरूपतापि किं न स्यात् दुःखरूपजगन्मयत्वात् दुःखरूपत्वे पुरुषार्थत्वाभावः स्यात्
ततो मुमुक्षूणां कथमुपादेयः स्यादिति चेन्न आनंदात्मत्वप्रतिपादनात् आनन्दरूपत्वप्रतिपादनात् न तस्मादुपादेयत्वमेव नहि सु
खरूपमात्मानमुद्दिश्य सर्वं च विधीयते येनात्मनो दुःखरूपता स्यात् किन्तु सर्वाधिष्ठानत्वमत्र विधानं यथा सर्पाद्यधिष्ठानं रज्जुर्विधी
ति

ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः ध्यानशब्देन विख्याता परमानन्ददायिनी २३
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः २४

न

नेत्र्यादिसर्वं रज्जुरेवेतिवत् तस्मात्सर्वस्यात्मैव रूपं नान्यत् दृश्यत्वादिरूपस्यानिर्वचनीयत्वेन मिथ्यात्वादित्यर्थः २२ ध्यानमाह
ब्रह्मैवास्मीति या पूर्वोक्ता ब्रह्माकारवृत्तिस्तस्या एव निरालम्बनतया निराश्रयतया वस्त्वन्तरमित्रध्येयानुसंधानरहितत्वात्तत्स्वरूप
तैव या स्थितिः सा सद्वृत्तिर्या ध्यानशब्देन शास्त्रे विख्याता प्रसिद्धेत्यर्थः वृत्तेः स्वरूपमाह परमानन्ददायिनीति तत्त्वा
नंदप्राप्त्यैव नद्विन्नोवानलावदत्यः आत्मभिन्नानामनात्मत्वकृतत्वकल्पत्वत्ताउन्नपरिच्छिन्नत्वादिना दुःखरूपतावगमात्
आत्मनोऽन्यदार्तमिति श्रुतेः आत्मनो नित्यस्वरूपस्य नित्यत्वेन प्राप्तिरूपस्य तत्प्राप्तिः कथं स्यादिति चेन्न नित्यप्राप्तस्यापि अज्ञ
ज्ञानवशादप्राप्तिमिव पूर्वं ध्यानावसाने वाक्यजन्यतदाकारवृत्त्या प्राप्तिमिवेक्षितेत्यर्थः तदुक्तं भगवता वसिष्ठेन स्वकंठपि
स्थितं वस्तु यथा न प्राप्यते भ्रमात् भ्रमान्ते प्राप्यते तद्वदात्मापि गुरुवाक्यत इति २३
अव

ननु निर्विकल्पसमाधौ वृत्त्यभासनेन वा स्वापाद्भेदेनापत्तिः। न चेत्तर्हि समाध्यभावः स्यात् सम्यगाधीयते ध्येयं यस्मिन्निति समाधिलक्ष-
अप० णादिति चेत्तत्राह निर्विकारतयेति ज्ञानज्ञानज्ञेयभेदलयपूर्वकमद्वितीयब्रह्माकारकारतया वृत्तेरतितरामेकीभावेनावस्थानं यत्त-
२५ न्निर्विकल्पसमाधिरित्युच्यते अतएवाह वृत्तिविस्मरणमिति यथा जलाकाराकारितलवणो नावभासेत जलमात्रमेवभासते
तथाऽद्वितीयवस्त्वाकाराकारितया वृत्त्यानवभासेनाद्वितीयब्रह्ममात्रमेव स्वयंप्रकाशतयाभासत इत्यर्थः २४

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः २४ एवं चाकृत्रिमानन्दं ता न
वत्साधु समभ्यसेत् वश्यो यावत्क्षणात्पुंसः प्रयुक्तः सम्भवेत्स्वयम् २५ ततः साधननिर्मुक्तः सिद्धो भव
ति योगिराट् तत्स्वरूपं न चैतस्य विषयो मनसो गिराम् २६

यानि पूर्वोक्तानि साधनानि तानि यावदकृत्रिमानन्दस्य ब्रह्मानन्दस्य नावाप्तिस्तावत् यत्नेनैव कर्तव्यानीति ननु ततः साध-
नानीत्युच्यते तान्येव पुनः स्वस्वरूपत्वेनाकृत्रिमानन्दप्राप्त्युपायत्नाभावेन लक्षणानीत्युच्यते इत्याह एवं चाकृत्रिमानं-
दमित्यादि श्लोकद्वयेन एवमकृत्रिमं ब्रह्मानन्दं अकृत्रिमं नाम कृतत्वाभावात् पुंसः पुरुषस्यानुभवार्थावतारणाच्च एवं क्षणात्स्व-
यं साक्षात्कृत्य स्वस्वरूपं भवति तावदभ्यासेन वा साधनेषु कर्तव्यः अतएव उक्तं साधु समभ्यसेदिति ततस्तत्सम्यग्वृत्तौ तु ए-
योगवित् प्राप्तयोगोऽखिलसाधनरहितो भवति कर्तव्याभावादित्याह सम्भवेत्स्वयमिति २५ तत्स्वरूपं तु वाङ्म-
नसोरगोचरत्वात् वक्तुमभावमपि दर्शयति तत्स्वरूपमिति २६

इदानीं समाधौ विघ्नानाह समाधाविति द्वाभ्यां पूर्वं स्वनियुक्तमनुभवबलेन यदवधारणं तस्य विस्मरणादनुसंधानराहित्यं प्रथमं द्वितीयं बलव
नबलं बलेन चित्तवृत्तेः स्तब्धीभाव आलस्यं स्रगादिविषयेषु प्रीतिर्भोगलालसं लयः निद्रा तमश्चाज्ञानमेव अन्यत्र चलनं विक्षे
पः उत्साहेनजः अध्यात्मकादिनाम जःस्वेदः यत्तत्त्वरूपं पूर्वाचार्यैर्निर्दिष्टं तत्त्वमसीत्यनेन तदेव श्रुतियुक्तिभ्यां प्रतिपादने सम
र्थो पि यत्तु तन्नित्याभिनिवेशराहित्यं यत्तच्छून्यत्वं द्वाभ्यां शून्यता अहं ब्रह्मास्मीति साक्षात्काराभाव इति फलितार्थः एते
२ विघ्नबाहुल्ये विहिते चित्तं निर्वातदीपवच्चालनं यदि भवति तदा निर्विकल्पकसमाधिरेव भवति अतो ब्रह्मविदा पुरुषेण

समाधौ क्रियमाणे तु विघ्नान्यायान्ति वै बलात् अनुसंधानराहित्यमालस्यं भोगलालसं २७ लयस्तमश्च विक्षे
पस्तेजःस्वेदश्च शून्यता एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः २८ भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि
शून्यता ब्रह्मवृत्त्या हि पूर्णत्वं तथा पूर्णत्वमभ्यसेत् २९

शनैः शनैरेतानि त्याज्यानीति तदुक्तं गीतासु शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया इति यदा ब्रह्माकारवृत्तिर्भवति तदा सा
तनिवृत्तिद्वारा तस्य तस्यैव विषयस्य प्राप्तिर्भवतीति नियमात् ब्रह्माकारवृत्त्यर्थमभ्यासः कर्तव्य २७ २८ तदेवाह भावव
त्त्याहीति यथा घटपटादिभावानामपरोक्षज्ञानार्थं विषयेन्द्रियसन्निकर्षे तन्याकृतिरुत्पद्यते तथा स्वस्वरूपे ब्रह्म
णि अहं तदस्मीति वृत्तिकत्वेनैव ब्रह्माहमस्मीति ब्रह्माकारवृत्तिर्भवतीत्यर्थः यतो ब्रह्मवृत्त्या हि पूर्णत्वं ततो ब्रह्मा
कारवृत्त्यर्थं पुनः पुनरभ्यसेदित्यर्थः तथा पूर्णत्वमभ्यसेदिति २९ ४ २ ७ ५ ४ ५ ४ रामाय नमः॥

ब्रह्माकारवृत्त्यभावे दोषमाह येहीति वृत्तिमिति ब्रह्माख्यां ब्रह्माकारां ब्रह्मस्वरूपां वृत्तेरेव सर्वपावनत्वमपि दृश्यति पावनीं परामिति तद्
श्री० ज्ञं नहि ज्ञानेन सदृशं पवित्रमिह विद्यत इत्यादि श्रुतेः ये ब्रह्माकारवृत्तिरहिता ज्ञानवतोऽभिमानिनस्ते तु वृथैव जीवंति तथा तेषां गीताख्
२६ मार्गः आमा पक्षमार्गेण मा पज्ञानविवेचनस इत्यत्र संमतिमाह आहारेति निद्राभयमैथुनानि समानि चैतानि पशुभिर्नराणां ज्ञ
ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिः समाना इत्युक्तत्वादाह पशुभिस्समेति ३० ये पुनः श्रवणादिसाधन
द्वारा पूर्वोक्तां वृत्तिं समुत्पाद्य मनननिदिध्यासनैर्निरंतरं गमयन्ते स्फुरणानिरवच्छिन्नत्वायेन दृढीकुर्वंति वर्द्धयंतीति ता नृसौति
येतु वृत्तिं विजानंतीति ये पुरुषाश्चरमवृत्तिं विजानंति सम्यक् विंदंति आशरीरपतनं प्रतिक्षणमभ्यसंति त एव पुरुषा धन्या
स्त्रैलोक्यपूज्याः कृतकृत्याः कर्मादावकर्मादिदर्शिन सत्य एवात्मज्ञा पंडिता इत्यर्थः पूर्वोक्तायां वृत्तौ मोहान्ये वत्सितेषां केसेमते माह यस्या

येहि वृत्तिं विहायेनां ब्रह्माख्यां पावनीं परां तेन वृथैव जीवंति पशुभिश्च समा नराः २९ ये तु वृत्तिं विजानंति ज्ञात्वा वर्द्धयंति ये
ते वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये ३१ एषां वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ३२

नुभवपर्यंतं नत्वेवृद्धिः प्रवर्तते न दृष्टिगोचराः सर्वमुच्यंते सर्वपातकैरित्यत आह ते वै सत्पुरुषा इति किंचित्तर्यातेनेन समस्तनीयस
सं लिलसर्वाणि दत्तावनिर्विज्ञानां वक्तं तं सहस्रमखिलादेवास्सं पूजिताः संसाराच्च समुद्धृता स्वपितरस्त्रैलोक्यपूज्योप्यसौ यस्य ब्र
ह्मविचारे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ३१ किंचान्यदपि एषां वृत्तिसमा वृद्धा इति येषां चरमवृत्तिर्ब्रह्माकारवृत्तिर्दारा बाह्ये तया
वर्द्धते पुनर्निदिध्यासनेन दृढा भवति ते तु ते नैव निष्प्रपंचब्रह्मस्वरूपमात्मं प्राप्ता एव इत्याह ते वाविति ब्रह्मविद्ब्रह्मैव भवति तरति
शोकमात्मवित् तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय इत्यादि श्रुतेः ये च इतरे शब्दवादिनः ज्ञाननिष्ठारहितास्ते
न ब्रह्मस्वरूपं परमप्रेमास्पदं नवंति न लभंते इत्यर्थः अस्मिन्नेवाह नेतरे शब्दवादिन इति ये तु ब्रह्माकारवृत्तिरहि
ताः शब्दवादिनः ते तु पुनः पुनः संसारदुःखं प्राप्नुवंतीत्यर्थः ३२ ६ ५ ७ ४ ५ रामाय नमः ॥॥

णं देवदर्शयंति कुशला ब्रह्मवार्तायामिति ये पुनः मंदभाग्या ब्रह्मवार्तायां ब्रह्मैवाहमिति संभाषणमात्रे कुशला निपुणास्त्वनुरा
नदाकारवृत्तिहीना रागद्वेषविमुक्ता ज्ञाननिष्ठाभिनिवेशशून्या इंद्रियाणामावर्जितानादिविषयभोगलोलुपा यज्ञोपवीचरणोद्गा स्वसं
पे प्रदायरहिताः प्रज्ञानतमा अप्रबोधमूर्खादिवसक्तचेतसस्ते पुनः पुनर्दुःखमनुभूय पतंति संसारदुःखसागरे तिन शरव्यावर्तयंत मा ह
नकपाचिन्त्यस्वरूपं ब्रह्ममात्रं न प्राप्नुवंतीत्यर्थः ३३ ये पुनर्वृत्तिविरहेण तेनु वृत्तिकामपि ब्रह्ममयीं ब्रह्मस्वरूपां वृत्तिं विना न तिष्ठं
तीत्याह निमेषार्धमिति यथा येन प्रकारेण पूर्वविदः सः सनकादिवामदेवशुकादयः निमेषमर्धमपि वरम वृत्तिं न त्यजंति न त्यक्त
वंतः तथा मुमुक्षवपि न त्यजेदित्यर्थः २४ नन्वेवं ब्रह्माकारवृत्तौ ज्ञाने सति यथा कश्चितरतनोभावेपि स्वकोमस्तित्वेन निवर्तते तथा का

कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः तेप्यज्ञानतमा नूनं पुनरायांति यांति च ३३ निमेषार्धं न तिष्ठंति वृत्तिं ब्रह्ममयीं विना
यथा तिष्ठंति ब्रह्माद्याः सनकाद्याः शुकादयः २४ कार्ये कारणतायाता कारणे न हि कार्यता कारणत्वं ततो गच्छेत्कार्याभावे वि
चारतः २५ अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् द्रष्टव्यं मृद्घटेनैव दृष्टांतेन पुनः पुनः ३६

र्यरूपसर्वप्रपंचाभावेपि ब्रह्मणि कारणे कारणत्वं न निवर्तते तथा च द्वैतापत्त्यापसिद्धांतं न स्यादिति चेत्तत्राह कार्ये कारणतायाति इ
ति कारणत्वं च कार्यापेक्षं भवति तदभावे न विद्यते अतः कस्मिन्नेव तस्मात्कार्याभावे कारणत्वं नास्ति न विद्यते इत्यर्थः ३५
कारणत्वाभावे च शुद्धस्वरूपं वाचामगोचरमवशिष्यते इत्याह अथ शुद्धमिति अथ ब्रह्माकारवृत्त्यनंतरं ब्रह्मस्वरूपं
कार्यकारणभावरहितं निर्विकारमेवावतिष्ठते स एव निर्विशेषत्वात्वाचामगोचरमेव यथा घटेति नष्टे मृत्तिकायाः क
स्यचित्कारणत्वं तथा प्रपंचाभावे ब्रह्मणोपि कारणत्वं न विद्यते तथा च श्रुतिः अपूर्वमनपरमनंतरमबाह्यं ब्रह्मेत्यादि
३६

मू० ततः शुद्धचित्तानां वृत्तिज्ञानं ब्रह्माहमस्मीत्याकारकमुदेतीत्याह अनेनैव प्रकारेणेति पूर्वोक्तप्रकारेण ततः परं कार्यकारणभावनि-
२८ षेधानन्तरं वृत्तिज्ञानमुदेति परिपक्वबाह्यानामित्यर्थः तुशब्दो मलिनचित्तानां व्यावृत्त्यर्थमेवाऽप्यनुक्तं उदेति शुद्धचित्तानामिति ३७
कारणस्वरूपे ब्रह्मणि कारणत्वनिषेधविधानं दर्शयति कारणं व्यतिरेकेणेति द्वाभ्यां अन्वयव्यतिरेकप्रमाणाभ्यां मायादिकार्य-
टी व्योमादिप्रपंचेषु कल्पितत्वाधिष्ठानत्वेन कारणत्वमेव पश्येत् पश्चात् श्रुतियुक्त्यनुभवबलेन कार्यनिषेधोपपत्त्या कारणे कारण-
स्वरूपे कार्यं स्वयमेवास्तमेति अभावं प्राप्नोति कार्यत्वात् तस्य कार्याभावे कारणत्वं स्थातुमशक्यत्वादित्यर्थः ३८ ३९

अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ३७ कारणं व्यतिरेकेण पुमानादौ विलोकयेत् अन्वयेन पुनस्तद्धि कार्ये नित्यं प्रपश्यति ३८ कार्ये हि कारणं पश्येत् पश्चात्कार्यं विसर्जयेत् कारणत्वं स्वतो गच्छेदवशिष्टं भवेन्मुनिः ३९ भावितं तीव्रवेगेन वस्तु यन्निश्चयात्मना पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ४० अदृश्यं भावरूपं च सर्वमेव चिदात्मकं सावधानतया नित्यं स्वात्मानं चैव भावयेत् ४१ दृश्यं त्वदृश्यतां नीत्वा ब्रह्माकारेण चिंतयेत् विद्वान्नि-

ततो मुनिर्मननशीलो विशिष्टः सर्वबाधावधिभूतो ब्रह्मस्वरूपो भवेदित्याह भावितमित्यादिभिः भावितं चिंतितं यद्वस्तु सच्चि-
दात्मा ह्ययं ब्रह्म परमार्थतः स्वाभिन्नमपि तीव्रवेगेन शीघ्रमेव भाविता सन्मुमुक्षुस्तद्रूपो भवेत् तत्रैव दृष्टान्तमाह भावितः नि-
श्चयात्मना प्रसन्नचित्तेन निश्चयात्मकबुद्धियुक्तेन कीटेन भ्रमरा भाविताः स्वस्वरूपं ददति भ्रमरकीटवत् यथा भृङ्गीनामकीटविशे-
षाः शरणागतान् कीटरूपं ददाति न हीत्यर्थः पुमान् तद्धि भवेदिति ४० केन प्रकारेण भावयेदित्याह अदृश्यमिति अ-
दृश्यानां कारणरूपं नेयाः कारणकार्ययोर्ब्रह्मस्वरूपमेव भावयेच्चिंतयेदित्याह ४१ दृश्यमिति ततो विद्वानात्मतः पूर्वोक्त-
भावनावशान्नित्यमेव सुखं यथा स्यात्तथा तिष्ठन् प्राप्नोति इत्याह विद्वान्नित्येति ४२ ४ ५ ४ ४ ४ ५ राम

र्वोक्तानि साधनान्युपसंहारव्याजेन स्तौति एभिरेभिरिति एभिः पूर्वोक्तैरेभिः साधनैरभियुक्तः समायुक्तो योगी स एव राजयोग
उदाहृतः कथितो विद्वद्भिः पुरातनैः करणानामसाध्यत्वादित्याह राजयोगमुदाहृत इति ४३ किंचित्पक्वकषायाणां मंदमध्य
१४० मबुद्धीनां च हठयोगेन संयुतानामभ्यासमेव मनसः शोधनं तद्द्वारा सिद्धिर्भवेदेव दर्शयति परिपक्वमनसां येषामिति नि
२८ त्यनैमित्तिकादिकर्मानुष्ठानेन परिपक्वकषायाणां मुमुक्षूणां गुरुदैवतभक्तानां सर्वेषां सुलभः सुखलभ्योऽयं जवात् येषां
नश्शीघ्रमेव भवेदित्याह केवलोऽयं चेति तदुक्तं यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः

एभिरेभिः समायुक्तो राजयोग उदाहृत किंचित्पक्वकषायाणां हठयोगेन संयुतः ४३ परिपक्वं
मनो येषां केवलोऽयं च सिद्धिदः गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ४४ इति श्रीमच्छंक
राचार्यविरचित अपरोक्षानुभव अगाधं संपूर्णमिति शुभमस्त्वास्तु ठिराष्टकान् कि निनयम

न इति किं बहुना शिष्यं शुद्धोरामिष्या पूरीतादिनिर्वाहार्थं किंचित्करोतीति न तत्त्वस्वरूपानुसंधानरहितत्वात् बहुधा वचनयाः
मर्थं लक्ष्योऽयं पदेन दृष्टाद्दृष्टेन ज्ञानी स्मावद्धे तत्त्वविद्याविचार्यं तत्र यदत्र सोऽण्वेव किंचिन्न करोत्येव मे वा हि यदत्रासोऽण्वं किंचिन्ममै
वगुणे नैहि इति श्रीमत्सुरूपानंदपूज्यपादशिष्येण राहडस्वामिना विरचितापरोक्षानुभवदीपिका समाप्ता शुभं ॥
ॐ नमः ॥ तपस्यस्य सितपक्षे दशम्यां तेन वराक्षी प्रवेशावसरे मगजातसेवरामकृष्णसन्निधौ नैवकार्थिना स्यान्याउ ऽपीतिदीपिका ॥
संवत् १८४६ २८